It is impossible for the senses even occasionally to transcend the limitations which are known to prevail with regard to the object by virtue of the merit acquired through the efficacy of the drugs administered by perfected souls, of *mantras* (charms), austerities (*tapas*) and yogic concentration. For these (i.e., drugs, etc.) have for their result only the manifestation of the capacity inherent in the different senses; and this capacity is well-defined (for each of them). Though the ear may have acquired excellent powers through a hundred drugs properly administered, yet it is incapable of apprehending such diverse qualities as colour and taste.

To put the matter in syllogistic form:—The excellence of the skill belonging to the senses, external and internal, concerning which there is dispute, does not transcend its limits or bounds; for it is sensory excellence like the one perceived by us. Hence, sensory knowledge cannot make known bygone things and the like.

Though the knowledge that arises at the culmination of the highest stages of concentration shines forth clearly and distinctly, whether it sets forth something additional to what is revealed in previous experience or embraces nothing more than that, such a knowledge has to whirl in the eddy of the one or the other of the two streams of remembrance (*smṛti*) and illusion (*vibhrama*), and has no chance whatever of reaching the shore of validity (*prāmāṇya*). There is much less chance of trying to

नियमव्यतिक्रमः ? अतिक्रमतो वा कुतः प्रत्यक्षत्वमिति न विश्वानुभवैश्वर्यशालिनि प्रत्यक्षं प्रमाणम् ।

नापि प्रमाणान्तरम् । तत्खल्वनुमानमागमो वा ? अनुमानमपि विशेषतो दृष्टं सामान्यतो दृष्टं वा ? तत्र सकलपदवीदवीयसि भगवति न तावत् स्वलक्षणसाक्षात्कारपूर्वकाविनाभावावधारणाधीनोदयत्वादिदमनुमानमुदेतुमलम् । न ह्यनवगतचरहुतभुजस्तदविनाभावितया धूममनुसन्धातुमीशते । न च सर्वार्थनिर्माणसाक्षात्कारपटीयसि लिङ्गं सामान्यतो दृष्टमपि किञ्चन लभ्यते ।

नन्वेकचेतनाधीनं विवादाध्यासितं जगत् ।
अचेतनेनारब्धत्वादरोगस्य शरीरवत् ॥
तथा सर्वार्थनिर्माणसाक्षात्करणकौशलम् ।
कार्यत्वादेव जगतस्तत्कर्तुरनुमीयताम् ॥

enchance its validity by stating that it is perceptual knowledge. If it were a perception, how could it transcend the well-known limitations with regard to objects ? If it were to transcend these, how could it still be perceptual in character ? Hence, perception cannot be a valid means of proof in regard to the person endowed with the superhuman power of experiencing all things.

It cannot be any other pramāṇa either. (If it be) is that other pramāṇa inference or scripture (*āgama*)? If it is inference, is that *viśeṣatodṛṣṭa* or *sāmānyatodṛṣṭa* ? (It cannot be *viśeṣatodṛṣṭa ;* for) concerning the existence of God, who is beyond the reach of all the means of proof, no inference can arise ; since the birth of the latter is dependent upon the assurance of universal concomitance (*avinābhāva*) between the hetu and the sādhya, which, in its turn, presupposes the direct perception of what is proved. Indeed, those who are ignorant of fire would be incapable of understanding smoke as a universal concomitant of fire. Nor is a mark of inference (*liṅga*) of the *sāmānyatodṛṣṭa* variety available in inferring the existence of a person who is competent to create all things and to perceive them directly.

THE NYĀYA ARGUMENTS FOR THE EXISTENCE OF GOD.

The world, concerning which the question is raised :—Is it, or is it not, due to divine creation ?—is subservient to a single intelligent entity ; for, like the body of one who is free from disease, it is constituted of non-sentient matter. Further, as the world is an effect, the ability to create all things and perceive them directly must be inferred to belong to its author.

सर्वं हि कार्यमुपादानोपकरणसम्प्रदानप्रयोजनसंवेदिचेतनरचितमवगतं घटमणिक-गृहादि। कार्यञ्च विमतिपदमवनिगिरिमहार्णवादीति तदपि तथाविधबुद्धिमद्धेतुकमध्यव-सीयते।

न च कार्यत्वमसिद्धमिति वाच्यम्; अवयवसन्निवेशादिभिर्हेतुभिस्तत्सिद्धेः। इह चान्त्यावयविभ्यः प्रभृति आद्व्यणुकमखिलमवयविक्रमनिहीयमाननानावयवव्यतिषङ्गविशेष-जनितमवगतमित्यन्तत उपादानं चतुर्विधाः परमाणवः प्रपञ्चस्य। तेषामादिपरिस्पन्दश्च तदनुगुणादृष्टविशिष्टतत्तत्क्षेत्रज्ञसंयोगासमवायिकारणक इति उपकरणमपि समस्तक्षेत्रज्ञ-वर्तीनि धर्माधर्मलक्षणान्यदृष्टानि। प्रयोजनं पुनस्तदभिनिर्वर्तितविचित्रार्थक्रियाकार श्चेतनोपकारप्रकारभेदोऽपर्यन्तः। तदुपभुजस्त एव क्षेत्रज्ञास्सम्प्रदानम्। न चामी स्वसम-वायिनावपि धर्माधर्मावलमवलोकयितुमिति तदतिरेकी निखिलभुवननिर्माणनिपुणोऽधिकरण-

Indeed, all effects such as pots, water-jars and houses are found to be created by intelligent beings who know the material and the auxiliary causes and also know for whom and for what purpose they are intended.[1] The objects under discussion, such as the earth, the mountain and the wide ocean, are effects; hence it has to be concluded that they, too, have for their cause an intelligent entity.

It cannot be contended that their being effects is itself unestablished; for this is well established on the strength of reasons such as the arrangement of the parts. All objects, commencing from wholes which are not themselves the parts of other wholes (*antyāvayavi*) and ending with the diads (*dvyaṇukas*), are known to be constituted by the peculiar combinations of diverse parts which decrease (in number) in accordance with the scale of wholes; hence it follows that ultimately four different kinds of infinitesimal atoms are the material causes of the world. As for the auxiliary cause (*upakaraṇa*), it must be the unseen powers (*adṛṣṭa*) in the shape of merit (*dharma*) and demerit (*adharma*) existing in all individual souls (*kṣetrajña*); for the initial movement (*parispanda*) of the infinitesimal atoms has for its non-inherent cause (*asamavāyikāraṇa*) their conjunction with the manifold souls associated with unseen powers in the form of merit and demerit (*adṛṣṭa*) which are appropriate to this movement. As regards the purpose (of creation), it is the limitless and manifold forms of help rendered to the jīvas, a help which is in the shape of diverse, fruitful activities performed by them. The self-same jīvas who derive this help are the very persons for whom (*sampradāna*) the universe is intended. For the reason that these jīvas are incapable of perceiving the merits and demerits,

1. Compare Pāṇiniś sūtra-karmaṇā yamabhipraiti sa sampradānam. I. iv. 32.

सिद्धान्तसमधिगतनिरतिशयसहजसकलविषयसंविदैश्वर्यशक्त्यतिशयः पुरुषधौरेय एकः किमिति न सामान्यतोदृष्टलिङ्गादनुमीयते ।

तदिदमविदितानुमानवृत्तस्य स्वमतिरचिततरळतर्कोल्लसितमिति परिहसन्ति मीमांसकाः । तथा हि—किमिदमेकचेतनाधीनत्वन्नामाभिप्रेतं तनुभुवनादेः ? तदायत्तत्वमिति चेत्,

किमस्य तस्मिन्नायत्तं किन्नु जन्माथवा स्थितिः ।
प्रवृत्तिर्वा द्वयोस्तावत्साध्यहीनं निदर्शनम् ॥

न खलु शरीरमेकचेतनाधीनोत्पत्तिस्थिति । ये हि यद्देहाधीनसुखदुःखोपभोगभागिनः, भवति हि तदुचितादृष्टशालिनां सर्वेषामेव तेषां तद्देहिन इव तदुत्पत्तिस्थितिनिमित्तत्वम् ।

अपि च शरीरावयविनः स्वावयवसमवायलक्षणा स्थितिः अवयवव्यतिषङ्गविशेषादृते

even though they are inherent in themselves, why should it not be inferred with the aid of a mark of inference (*liṅga*) of the *sāmānyatodṛṣṭa* variety that there is a Supreme Person, who as understood from the *Adhikaraṇa-siddhānta*, is different from these finite souls, who is competent to create all the worlds, who is endowed with a knowledge of all things, which is of the most excellent kind and which is natural to him, and who is endowed with lordship and power of unsurpassed excellence.

THE MĪMĀMSAKA CRITICISM OF THE NAIYĀYIKA VIEW

The Mīmāmsakas ridicule this line of thought as being the outcome of arguments which are unsustainable and which are framed by the imagination of one who is ignorant of the methods of inference. To make the matter clear—What is the precise significance of the statement that the body, the world and the like are subservient to a single conscious entity ? If it is said that it signifies dependence upon that entity, (it may be asked) what is it that is dependent upon him ? Is it their origin or continuance or activity ? On the first two alternatives, the illustrative example cited would be defective in not possessing the *sādhya*. Indeed, the body is not dependent for its origin and continuance upon a single intelligent entity. All persons who share in the enjoyment of the pleasures and pains dependent upon a given body must also, equally with the person who owns it, be responsible for its origin and continuance; since they are endowed with unseen powers (*adṛṣṭa*) appropriate to that enjoyment.

The continuance of a complex whole like that of the body, which is in the form of the inherence of the whole in its parts, requires no

न चेतयितारं परमपेक्षते । या पुनस्तदपेक्षिणी प्राणनलक्षणा स्थितिः, न सा पक्षीकृते क्षित्यादौ सम्भवतीति स्थितिमपि नैकरूपां पक्षसपक्षानुयायिनीमुदीक्षामहे ।

एकचेतनाधीनप्रवृत्तित्वे तु प्रबलबहुजनसरभसप्रयत्नप्रचाल्यैरुपलतरुरथादिभिर्व्यभिचारः । आरब्धत्वादेव चैतत्साध्यसिद्धावधिकमिदमुपादानविशेषवचनम् ।

चेतनाधीनतामात्रसाधने सिद्धसाध्यता ।
चेतनैर्भोक्तृभिर्भोग्यः कर्मभिर्जन्यते हि नः ॥

युक्तश्चैतत्, यदुभयवादिसिद्धानामेव चेतनानां कर्तृत्वाभ्युपगमः ; लाघवात् ।

न चोपदानाद्यनभिज्ञतया तत्प्रतिक्षेपः ;

उपादानं पृथिव्यादि यागदानादि साधनम् ।
साक्षात्कर्तुं क्षमन्ते यत्सर्व एव च चेतनाः ॥

intelligent being apart from the peculiar inter-relation of the parts themselves. Continuance, understood in the sense of breathing, which stands in need of an intelligent person, is not met with in the earth and the like, which are offered as the *pakṣa* (minor term) in your argument; hence we fail to discern a uniform type of continuance existing in common in both the minor term (*pakṣa*) and the illustrative example (*sapakṣa*).

Should it be said that 'dependence' means having an activity subject to the control of a single intelligent entity, then, in consideration of instances like huge boulders or trees or cars which could be moved only with the strenuous effort put forth by several strong persons, the argument is liable to be charged with the fallacy of *vyabhicāra*. Again, when the conclusion (namely, that the world presupposes an intelligent cause) follows from the very fact of the cosmos being constituted of (matter), the addition of the qualification 'endowed with a knowledge of the material cause and so on' is superfluous. If the argument were to establish only dependence upon a conscious entity, then, the argument is liable to be charged with the defect of proving what is already well-established; for this world has been created by our own past deeds (*karma*) as something fit for enjoyment by conscious beings, experiencers (*bhoktā*). It is proper to admit that the agency for the creation of the world belongs only to the conscious beings posited by both the rival disputants; for this hypothesis has the merit of economy of thought (*lāghava*).

It is impossible to deny agency to finite souls, on the score that they are not acquainted with the material cause and the like. For all intelligent beings are quite competent to perceive directly the material causes, namely, the elements like earth, and the auxiliary causes such as sacrifice (*yajña*) and gift (*dāna*).

अद्यवदेव विश्वम्भरादयः क्रमप्राप्तागन्तुकोपचयापचयैकदेशशालिनो न युगपदेव निरवशेषविलयजननभागिन इत्यन्तिमपरमाणुसाक्षात्कारो न कर्तृभावोपयोगी ॥

कर्मणश्शक्तिरूपं यदपूर्वादिपदास्पदम् ।
मा भूत्प्रत्यक्षता तस्य शक्तिमद्ध्यक्षगोचरः ॥

न खलु कुलालादयः कुम्भादिकार्यमारम्भमाणास्तदुपादानोपकरणभूतमृद्दण्डचक्रादिकार्योत्पादनशक्तिं साक्षात्कृत्य तत्तदारभन्ते । यदि परं शक्तिमविदुषामभिलषितसाधने तदुपादानादिव्यवहारोऽनुपपन्नः । इह तु

आगमादवगम्यन्ते विचित्राः कर्मशक्तयः ।
तेन कर्मभिरात्मानस्सर्वं निर्मिमतां पृथक् ॥

अपि च तदेव चेतनकर्तृकं जगति परिदृश्यते, यदेव शक्यक्रियं शक्यज्ञानोपादानादि च । न तथा महीमहीधरमहार्णवादीति कथमिव तत्तत्कार्यत्वम् ? कथन्तराञ्च तदुपादा-

Direct perception of the infinitesimal atoms which are the ultimate building materials is not required for agency; because earth and other elements possessing at all times, as at the present moment, partial growth and decay which take place occasionally and gradually, do not secure at any time total annihilation or creation.

(It is futile to contend that as *yāga* and *dāna* become the causes of creation only through the mystic power (*apūrva*) which they generate and as this power is imperceptible to the jīva, he cannot be the agent; for) the mystic potency of activities which is referred to by terms, such as '*apūrva*,' may not be perceptible; but, surely, the act itself possessing this power is open to perception. In fact, the potter and other agents engaged in producing objects, such as jars, do not enter upon their respective activities only after having directly perceived the potency to produce the effect residing in their material and auxiliary causes, such as, the lump of clay and the wheel. However, in producing objects that are desired, the utilisation of their respective material causes would be impossible to those who are altogether ignorant of their potency. But here, the manifold potencies of activities are learnt through scriptures. Therefore, let it be held that finite souls severally are the agents in creating everything in the world with the aid of their own deeds.

Moreover, only that which it is possible to make, and whose material cause can possibly be known, is found everywhere to have a conscious being for its agent. For the reason that the earth, the mountain and the mighty ocean do not possess this nature (i.e., it is impossible to make them; and their material causes cannot be known), it is difficult to imagine how they can be regarded as the respective

नोपकरणादेस्साक्षात्कारगोचरता ? यादृशं हि कार्यमुपादानाद्यभिज्ञपूर्वकमवगतं घटमणिकादि, तादृशमेव हि तथाविधबुद्धिमद्धेतुकत्वानुमानाय प्रभवतीति ।

अपि चानीश्वरेण परिमितशक्तिज्ञानेन विग्रहवता अनवाप्तकामेन कृतमवगतं घटादिकार्यमिति तथाविधं बोद्धारमुपस्थापयन्हेतुरभिमतपुरुषसार्वज्ञ्यसर्वैश्वर्यादिविपर्ययसाधनाद्विरुद्धः स्यात् ।

न चैवं सति सर्वानुमानव्यवहारोच्छेदप्रसङ्गश्शङ्कितव्यः । प्रमाणान्तरगोचरे हि लिङ्गिनि लिङ्गबलादापततो विपरीतविशेषांस्तत्प्रमाणमेव प्रतिरुणद्धि । इह पुनरतिपतितसकलमानान्तरकर्मभावे सर्वनिर्माणनिपुणे सिषाधयिषिते यावन्तोऽन्वयव्यतिरेकावधारिताविनाभावभाजो धर्मास्तानप्यविशेषेणोपस्थापयति ।

अपि च—

effects of different causes. It is even more difficult to conceive how their material and auxiliary causes could become the objects of direct perception. Only an effect like the jar or the water-pot, which is known to be dependent upon an intelligent entity acquainted with material and other causes, is capable of leading to the inference that an effect must have for its cause a sentient being possessing a knowledge of that kind (i.e., knowledge of *upādāna, upakaraṇa* and the like).

Further, in as much as an effect like the jar is known to be produced by a person who is different from God and who possesses limited powers and knowledge and who is endowed with a personality, and who has desires which are unfulfilled, the reason (*hetu*) cited by you, establishing as it does a knower answering to this description, is liable to be charged with *viruddha doṣa*. For it establishes the very reverse of omniscience and lordship over the universe which is sought to be proved as belonging to the person who is suggested to be the cause of the world.

(The Mīmāmsaka continues:)—There is no room for the objection that if this were so there would be an end to all reasoning. For, if the thing proved (*lingin*) is open to any *pramāṇa* other than that on which it is at the moment based, this other *pramāṇa* itself would dispel the contradictory features suggesting themselves on the strength of the mark of inference (*linga*). In the present case, however, when a person who transcends the reach of all other *pramāṇas* and who is competent to create all things is desired to be proved, the reason (*hetu*) will, in addition to proving him, establish also all those features which possess invariable concomitance ascertained on the strength of positive and negative evidence.

स्वार्थकारुण्यभावेन व्याप्ताः प्रेक्षावतः क्रियाः ।
ईश्वरस्योभयाभावाज्जगत्सर्गो न युज्यते ॥

अवाप्तकामत्वान्न तावदात्मार्थं सृजति । प्रळयसमये प्रलीनसकलकरणकळेबरादि-भोगोपकरणतया च चेतनानां दुःखाभावाद्दुःखिदर्शनजनितकृपाप्रयुक्तिरपि नास्तीति व्यापकभूतस्वार्थकारुण्यनिवृत्तेर्व्याप्यभूतया प्रेक्षावत्प्रवृत्त्यापि निवर्तितव्यम् ।

सुखैकतानं जनयेज्जगत्करुणया सृजन् ।
तत्कर्मानुविधायित्वे हीयेतास्य स्वतन्त्रता ॥

न चोपादानादिसाक्षात्कारिण एव कर्तृत्वमित्यपि नियमः ; उपादानमुपकरणञ्चाविदुष एवात्मनो ज्ञानादिषु कर्तृत्वात् । अतः

असिद्धत्वाद्विरुद्धत्वादनैकान्त्याच्च वर्णितात् ।
कार्यत्वहेतोर्जगतो न यथोदितकर्तृता ॥

प्रयोगश्च भवति—महीमहीधरादि कार्यं न भवति, प्रसिद्धकार्यविलक्षणत्वात्,

The activities of a person in his senses are always invariably characterised by thought of personal gain or love to others. Since, in the case of God, none of these exists, the creation of the world cannot justifiably be ascribed to him. As all his desires are already fulfilled, he does not create the world for his own sake. Since at the time of dissolution (*pralaya*) the jīvas are destitute of all the senses, body and other means of enjoyment, no sorrow is experienced by them; as a consequence, creation cannot be the result of the mercy evoked by the perception of persons afflicted by sorrow; hence, with the absence of the *vyāpaka* (the invariably concomitant), namely, personal gain and mercy, there must be the absence of the *vyāpya* (that which is inherent), namely, the activity of a sensible person. He who creates the universe out of mercy must have created it in such a fashion that pleasure alone is present in the universe. If it were suggested that he pays due regard to the past deeds of jīvas, his independence would be lost.

Besides, there is no rule to the effect that agency belongs only to that person who directly perceives the material cause and the like; for in respect of activities, such as knowing, agency belongs to the soul even though the latter is ignorant of the auxiliary causes. Hence, in as much as the *hetu*, namely, 'being an effect' is liable (for the considerations mentioned just now) to be charged with the defects of being unestablished (*asiddha*), adverse (*viruddha*) and *anekānta* (straying), it is impossible that the universe should have for its cause a person like the one suggested by you.

This may be expressed in syllogistic form thus:—(1) Phenomena, such as, the earth and the mountain, are not effects, for the reason that,

गगनवत्, अशक्यदर्शनोपादानोपकरणत्वाद्वा व्यतिरेकेण घटादिवत्। परमाणवः न प्रत्यक्षाः, निरतिशयसूक्ष्मद्रव्यत्वात्, तथैव घटादिवत्। विमतिविषयः कालः न लोकशून्यः, कालत्वात् इदानीन्तनकालवत्। तनुभुवनादि ईश्वरकर्तृकं न भवति, कार्यत्वात्तद्वदेव। ईश्वरः कर्ता न भवति, प्रयोजनरहितत्वात्, अशरीरत्वाद्वा मुक्तात्मवत्। इति।

अत्र ब्रूमो न कार्यत्वं क्षित्यादौ शक्यनिह्नवम्।
सभागत्वात्क्रियावत्त्वान्महत्त्वेन विशेषितात्॥
तादृशादेव मूर्तत्वाद्बाह्यप्रत्यक्षतान्वितात्।
ससामान्यविशेषत्वादित्यादिभ्यो घटादिवत्॥

न चेदृश एव सन्निवेशः कार्यो नेतर इत्यवयवसन्निवेशप्रतिनियतं रूपभेदमुदीक्षामहे।

यत्तु शक्यक्रियं शक्यज्ञानोपादानोपकरणं च क्रियत इति, तदस्तु नाम। किन्तु

like ether, they are thoroughly unlike what are well-known to be effects, or for the reason that here, unlike the case of jars, the knowledge of material and auxiliary causes is impossible to secure. (2) The infinitesimal atoms are imperceptible; for, unlike jars and the like, they are exceedingly subtle substances. (3) The period under discussion (i.e., *pralaya*) is not characterised by the absence of the world; for it is also a period like the present one. (4) The body, the world and the like do not have God for their agent; for, like the jar, they are effects. (5) God is not an agent, because he has no purpose in creating the world, or because, like the released soul, he is not possessed of a body.

THE NAIYĀYIKA REPLY TO THE MĪMĀMSAKA CONTENTION

To these arguments of the Mīmāmsaka the Naiyāyika replies:—The character of being an effect cannot be denied to earth (*kṣiti*) and other substances; because, like the jar etc., they are endowed with parts, or with activities while they are yet big in magnitude, or with forms while they are yet big in magnitude, or with wider and narrower generality (*sāmānya-viśeṣa*) while they are open to external perception and because of other reasons like this. We know of no distinct feature associated exclusively with a particular configuration of parts, about which it could be said 'This mode of configuration alone is an effect, and none else is.'

The contention that that alone can be said to be created which it is possible to produce and whose material and auxiliary causes can possibly be known may be true enough; but the capacity to do and the power

ते क्रियाज्ञानशक्ती क्रियाज्ञानाभ्यामेव समधिगमनीये । ते च क्षित्यादिषु यथोक्तसाधनबल-समुत्थापिते इति न विशेषः प्रसिद्धप्राकारगोपुरादिकार्येभ्यस्तनुभुवनादेः । न चैतावानेव क्रियागोचर इति विषयनियमः कश्चित् क्रियाया दृष्टः, येनेदमशक्यक्रियमध्यवस्येम । सिद्धे च कार्यत्वे तदुपादानादिसाक्षात्करणतदधिष्ठानतत्प्रेरणनिपुणः पुरुषविशेषस्सिद्ध्यत्येव ।

अधिष्ठानं च तत्प्रवृत्त्यनुगुणसङ्कल्पवदीश्वरसन्निकर्षः ; क्षेत्रज्ञेनेव स्वशरीरादौ । स च द्रव्यैस्संयोगलक्षणः । तद्गुणैस्तु संयुक्तसमवायरूपः ।

प्रवृत्तिश्च परमाणूनां परिस्पन्दलक्षणा । धर्माधर्मयोस्तु फलोदयानुकूलतादृश-देशकालादिसहकारिसहितता ।

न च* ताभ्यां धर्माधर्माभ्यामेव फलम् ; चेतनानधिष्ठितानां सर्वेषामेतेषामचैतन्ये-

to know can only be inferred from activity and knowledge. And since these have been shown to exist in respect of the earth (*kṣiti*) and the like, on the strength of the reasons adduced already, it is clear that there is no special feature that could mark off the body, the world and the like from well-known effects, such as, the temple tower and the wall. No restriction to the effect 'The scope of activity is only this much' is noticed to limit activity to certain objects alone; and if such a restriction exists, we may assert that this cosmos is impossible of production. If it is proved to be an effect, it necessarily follows that there is a person who is competent to perceive directly its material and other causes, and to control and direct the same.

As in the case of the control of his own body and (senses) by the jīva, here also (i.e., in regard to the cosmos) control (*adhiṣṭhāna*) consists merely in the proximity (to the cosmos) of a God possessed of a will conducive to its activity. With regard to substances (*dravya*) this proximity takes the form of conjunction (*samyoga*) ; and in regard to their qualities, it is inherence (*samavāya*) in that wherein there is conjunction (*samyukta*).

Coming to activity (*pravṛtti*), that of infinitesimal atoms is merely change of place (*parispanda*). With regard to merit (*dharma*) and demerit (*adharma*), their activity is simply their coming into association with appropriate place (*deśa*) and times (*kāla*) and other auxiliary causes helpful to the starting of the fruits of deeds.

It is wrong to maintain that the fruits of activities result from merit and demerit themselves ; for these and all other things not controlled by an intelligent entity cannot effect anything by themselves ; since they are

---

*In the printed books and manuscripts this sentence reads thus, without the negative particle, 'tābhyām dharmādharmābhyām phalam'. But from the context it is clear that the text should be 'na ca tābhyām....'

नाकिञ्चित्करत्वात् । न हि चेतनेन वर्धकिनानधिष्ठिता वासी देशकालादिसहकारिशत-समधिगमेऽपि यूपादीन्यापादयितुमलम् । बीजाङ्कुरादयस्तु पक्षान्तर्भूता इति तैर्व्यभिचार-वचनमनभिज्ञतयैव श्रोत्रियाणाम् । एतेन सुखादिभिर्व्यभिचारोऽपि प्रत्युक्तः ।

न चोभयवादिसिद्धतामात्रेण क्षेत्रज्ञानामेवेदृशाधिष्ठातृत्वकल्पनमुचितम् ; तेषां सूक्ष्मव्यवहितादिदर्शनाशक्तेर्निश्चितत्वात् । दृष्टानुसारिणी हि सर्वत्र कल्पना ; न दृष्टविरोधिनी । न चैवमीश्वरस्याशक्तिर्निश्चिता ; प्रमाणान्तरतस्तत्सिद्धेः । यथोदितप्रमाणबलेन सिद्ध्यन् सांसिद्धिकसर्वार्थदर्शनतत्प्रेरणशक्तिसम्पन्न एव सिद्ध्यति ; कार्यत्वस्य समर्थकर्तृ-पूर्वकत्वेन प्रतिबन्धात् ।

devoid of sentience. Though provided with auxiliary causes, such as place and time, the axe not controlled by a carpenter, an intelligent being, is, indeed, incapable of making objects like the sacrificial post (*yūpa*). For the reason that instances such as seed-sprout are already included in the *pakṣa* (minor term), the suggestion that in view of the case of seed-sprout (where the non-sentient seed, not controlled by any intelligent agent, produces the seed by its own effort) the foregoing argument commits the fallacy of *vyabhicāra* is the outcome of the ignorance (of the methods of inference) found in persons who are merely versed in the vedas. On the same count, the attempt to level the charge of *vyabhicāra* by citing the instance of pleasure[2] and the like stands condemned.

It is not right to attribute control to finite souls themselves simply because they are accepted by both the rival disputants; for the jīva's incapacity to perceive what is subtle and what is screened from view is well established. (Rather than admitting a separate entity, God, would it not be better to attribute this capacity to perceive the subtle and the hidden to finite souls themselves? The answer is in the negative) for what is posited must everywhere be in conformity with, and not contradictory to, what is known. It is not well established that the incapacity to perceive the subtle and the veiled belongs to God, as it belongs to the jīvas; because by means of other pramāṇas the capacity to perceive them is proved to belong to him. The person whose existence is proved on the strength of the argument already advanced is surely ascertained to possess in his essential nature the capacity to perceive all things and to direct them; for 'being an effect' is invariably concomitant with 'dependence upon a competent agent.'

2. Since pleasure and other affective states, which are devoid of consciousness, produce, even in the absence of any control from an intelligent person, their appropriate bodily responses, such as smiling, flow of tears and several organic and visceral changes, it may be urged that the argument is vitiated by *vyabhicāra doṣa*.

यत्तु परिमितशक्तिज्ञानानैश्वर्याद्यापादनाद्धर्मविशेषविपरीतसाधनत्वमुद्भावितम्; तदतिस्थवीयः; अप्रयोजकत्वात्तेषाम्। न हि किञ्चित्क्रियमाणं कर्तुरर्थान्तरविषयमसामर्थ्यमज्ञानं* वा स्वोत्पत्तयेऽपेक्षते; स्वसम्पादनसमर्थकर्तृमात्राक्षेपात् केवलं व्यतिरेकासिद्धेः‡। तावतैवोपपद्यमाने कार्योदयेऽसम्बन्धिनोऽकिञ्चित्करस्यार्थान्तरविषयस्याभावस्य हेतुत्वकल्पनानुपपत्तेः।

अपि च किं तदितरसमस्तवस्तुविषयमज्ञानादिव्यापकमुत कतिपयगोचरमिति विवेचनीयम्। न तावदशेषविषयम्; अनुपलब्धेः। न खलु कुम्भकारः कुम्भातिरेकि किमपि न विजानाति। अथ कतिपयविषयम्; तदपि न, अनियतविषयतया तस्य तस्य व्यभिचारदर्शनात्। न चास्ति किञ्चिद्व्यवस्थितं, यदविद्यादिमानेव कर्तृतामनुभवति।

The objection raised already (vide p. 162), namely that, as the *hetu* points only to limited capacity and fragmentary knowledge and to the absence of lordship, it establishes only the reverse of the qualities intended to be proved, is highly superficial; for, clearly, the *hetu* in question does not lead to the inferring of limited powers and the like. In fact, for its own production any object that is being produced does not require on the part of its agent either the incapacity to effect other things or ignorance concerning them; for, in as much as it would only lead to the inference that there is a person competent to make it, the absence of the capacity to produce other things does not follow therefrom. When the production of an effect may well take place solely with the aid of knowledge and power concerning the same, it is quite unnecessary to consider what is wholly unrelated to it and what has nothing to do with it, namely the absence (of knowledge and power) concerning other effects, as being responsible for its production.

Further, it has to be carefully ascertained whether what is said to be invariably concomitant (*vyāpaka*), namely, 'ignorance of other things and incapacity to effect them', concerns all things other than the effect in question or certain things only. It cannot be ignorance pertaining to all things; for we know of no such ignorance. Indeed, the potter is not ignorant of everything excepting the pot. If it be urged that the ignorance pertains to certain things only, even this suggestion fares no better; for, so long as the object of ignorance is left unspecified, the argument is liable to be charged with *vyabhicāra doṣa* in view of the fact that even in the absence of ignorance concerning any given object, agency is still possible. No one object has been specified in order to be able

* The reading found in all books is '. . . asāmarthyam jñānam . . .' but it ought to be '. . . asāmarthyamajñānam . . .'

‡ All books examined read 'kevalavyatirekāsiddheḥ'. Perhaps a better reading would be 'kevalam vyatirekāsiddheḥ'.

न च शरीरिणैव कर्त्रा भाव्यम् ; शरीरग्रहणेनैवानैकान्त्यात् । न खलु शरीरविशिष्टस्सन्नेवायमात्मा शरीरमुपादत्ते ; योगिनो युगपदनेकशरीरग्रहणायोगात् । पूर्वदेहपरित्यागेन देहान्तरप्रापककर्मप्रेरितप्राणसहाय एव देहान्तरं प्रविशतीत्युपपादितमात्मचिन्तायाम् ।

किञ्च आत्मनश्शरीरमधितिष्ठतोऽधिष्ठानक्रियाकर्मभूतस्य देहस्याधिष्ठातृदेहानुप्रवेशोऽनुपपन्नः ; युगपदेकक्रियायामेकस्य कर्मकर्तृत्वविरोधात् । अधितिष्ठासितदेहसंयोगवत एव तत्प्रवृत्त्यनुगुणप्रयत्नयोगलक्षणमधिष्ठानं दृष्टमिति चेत् , नह्येतत् । किन्तु तदसम्बद्धस्य तदधिष्ठानानुपपत्तेः* प्रेर्यवस्तुसम्बन्धिना प्रेरकेण भवितव्यमिति । किन्तु न पुनर्देहसम्बन्धेन भाव्यमिति कुतो निर्णयः ? इत एव यतोन्यदप्यधिष्ठीयमानं मानदण्डादि स्वसम्बन्धिनैवा-

to assert " Only that person who is ignorant of such and such an object is fit to become an agent."

There is no need to contend that the agent should only be a person endowed with a body ; for this contention is liable to be charged with *anekānta doṣa* in view of the very fact of the activity of assuming a body. Indeed, the soul does not take up a body while being already associated with a body ; for, then, it would be impossible for the yogin to take up several bodies simultaneously. When discussing the nature of the soul it has been shown that it is only after relinquishing the former body the soul enters upon another solely with the assistance of vital breath (*prāṇa*) which is induced to activity by past deeds which procure a fresh body.

Moreover, the body which is the object of the controlling activity on the part of the self, the controller of the body, cannot intelligibly be included in the very body of the definition of the controller ; for one and the same thing being at once the agent and the object in the selfsame activity involves a contradiction. If it be maintained that control, which is simply the possession of an effort conducive to the activity of the body, is known to belong only to him who is in conjunction with the body which is sought to be controlled, it has to be replied : ' let it be admitted that the controller should be related to the object controlled ; since the control of a given object is impossible to him who is unrelated to it.' (It may be asked) How is it determined that this relation need not be the bodily relation ? (The reply is) " It is for this reason, namely, that other objects also, such as

* In preference to the two readings (i) astvekatattvasambandhasya adhiṣṭhānānupapatteḥ (Chaukamba edition) and (ii) astvekatattvasambaddhasya adhiṣṭhānānupapatteḥ (Telugu edition), the variant reading suggested in the Telugu edition—nahyetat | kintu tadasambaddhasya tadadhiṣṭhānānupapatteḥ—has been adopted.

घिष्ठीयते । तेनाधिष्ठानक्रियापेक्षिताधिष्ठेयपदार्थसंम्बन्धमात्रातिरेकेण देहसम्बन्धो नामापरो नादर्तव्यः । अस्ति चेश्वरस्यापि जगदुपादानोपकरणैस्सम्बन्ध इत्युक्तमेव ।

अथ स्वदेहव्यतिरिक्ते वस्तुनि प्रवृत्तिविशेषकरत्वं देहद्वारेणैव ; दृष्टं हि दण्डचक्रादिषु करसंयोगादिना कुलालादेः प्रवर्तयितृत्वमित्युच्येत ; तदपि न ; अभिध्यानमात्रेण परशरीरगतगरनिरसनविसारणदर्शनात् ।
कथमसति शरीरे परप्रेरणात्मकः सङ्कल्प इति चेत्, किं शरीरं सङ्कल्पयति येन तदभावे न भवेत् । करणमिति चेन्न ; मनसः करणत्वात् ।

किमस्तीश्वरस्य मनः ? बाढम् । नन्वेवं विग्रहधर्माधर्मानैश्वर्यादयस्साधारणधर्माः प्रादुष्ष्युः । मैवम् ; कार्यत्वाक्षिप्तसमर्थकर्तृमत्त्वदृढिम्नैवापास्तत्वात् । मनसो नित्येन्द्रियतया देहापगमेऽपि सम्बन्धाभ्युपगमादनैकान्तिकश्च । यावद्धि दृष्टानुगुणं व्याप्त्यु-

the measuring rod, are controlled by one who is merely related to them." Therefore, apart from what is required for the controlling activity, namely, mere relation to the object controlled, no other relation, like the relation to the body, need be countenanced. And it has already been pointed out that relationship to material and auxiliary causes of the cosmos exists in God.

It may be objected that the causing of any particular form of activity in things other that the body is done only with the aid of the body; for it is found that the power in the staff, wheel and the like belongs to the potter and other agents only in virtue of factors, such as contact with the hand. This objection too is untenable; for the extraction and the scattering of the poison that has entered one's body is observed to be effected by another by the mere exercise of his will.

When the body is absent how, it may be asked, could the will to cause movements in other things arise? (The reply is) Then is it contended that it is the body that wills? If that is so, in its absence there will be no will. Should it be urged that the body (does not itself will, but) is the instrument (*karaṇa*) in the act of willing, it may be replied "not so"; for the mind (*manas*) is the instrument of willing.

Has God, then, a manas? (The answer is) "Quite so". If it be said that in that event, certain common features, such as the possession of a body, merit and demerit and the absence of sovereignty, would have to be attributed to God; the reply is "not so." For this objection is set aside on the very strength of the fact of the world having a competent agent, a fact inferred with the aid of the *hetu* that it is an effect. Moreover, since even when the body perishes contact with manas has been admitted, in as much as it is an eternal organ of sense, the argument is vitiated by *anekānta doṣa*. In fact, only that much which is

पयोगि, तावदनुज्ञायते । न चास्मदादेर्मनसाप्यचिन्त्यरचनस्यापर्यन्तविस्तारस्य महाभूतभौतिकप्रपञ्चस्य प्रादेशिकशरीरकः किञ्चिज्ज्ञः पुण्यपापपरवशगतिरलं निर्माणायेत्यपरिमितज्ञानैश्वर्यशक्तिः शरीराद्यनपेक्षस्सङ्कल्पादेव सकलभुवननिर्माणक्षमः कर्ता सिद्धः ।

ईदृशेन कर्त्रा घटादिषु कार्यत्वस्य सम्बन्धो न दृष्ट इति चेत्, अतिगहनगिरितटाधिष्ठानेन अतिप्रकृष्टादृष्टचरेन्धननिवहसम्बन्धिना हुतवहविशेषेण महानसादौ धूमस्य वा किं सम्बन्धो दृष्टः, येन धूमविशेषदर्शनाद्गिरिशिखरे तथाविधाग्निरनुमीयते । यादृशो धूमो यत्रावगतस्तत्रैव तादृशस्तत्सम्पादनसमर्थः । दृष्टान्तभूमावपरिदृष्टोऽपि सामान्यव्याप्तिबलेन पक्षधर्मतावशात्सिद्ध्यतीति चेत्, तदिदमस्माभिरभिधीयमानं किमिति न हृदयमधिरोहति भवताम् । इहापि कार्यत्वं

relevant to the inductive relation and which is in conformity with what is perceived is admitted. Since a person whose body occupies a limited area, whose knowledge is limited and whose action is subject to merit and demerit, is incapable of creating the world composed of the primal elements and what is constituted of these, and possessed of a structure inconceivable even by our minds and an extent which is boundless, it has to be concluded that there is an agent who is endowed with illimitable knowledge, sovereignty, and power and who, without requiring the body, is capable of creating all the worlds with the sole aid of his will. If it be said that in instances such as the jar no invariable relation between the character of being an effect and an agent of this description is observed, (we ask in reply) is the relation of smoke with fire of a description which exists on the dense hill side, which is never experienced before, which is huge in volume and fed by an enormous quantity of fuel ever noticed in the kitchen ? If it were so, on the perception of a particular kind of smoke it could be inferred that on the hill-top there is fire of that description. If it be said that when a certain kind of smoke is found in a given place (to be concomitant with a particular kind of fire) that kind of smoke will be capable of leading to inference of that kind of fire in that locality alone, and that a fire of a different description, even when it is not noticed in the illustrative example, could still be inferred with the aid of the inductive relation of smoke in general with fire in general, in consideration of the pakṣa wherein it resides (in this argument it is the hill), (we ask) how is it that when we maintain the same position it fails to appeal to your mind? Here also the character of being an effect, which is known in examples, such as the pot, to have an invariable concomitance with dependence

समर्थकर्तृपूर्वकत्वेन घटादिषु विदितसम्बन्धनियमं क्षित्यादिषु दृश्यमानं स्वसम्पादनसमर्थमदृष्टपूर्वमेव बुद्धिमत्कर्तारमुपस्थापयति । यथैव हि देशकालेन्धनपरिमाणादिविशेषानादरेण धूमस्य स्वोदयानुगुणहुतवहमात्रेण सम्बन्धनियमः, तथैव अनीश्वरत्वकिञ्चिज्ज्ञत्वशरीरित्वपुण्यपापपरवशत्वमनुष्यत्वादिविशेषप्रहाणेन कार्यस्य स्वनिर्माणसमर्थबुद्धिमत्कर्तृमात्रेण सम्बन्धनियमनिश्चय इति न कश्चिद्विशेषः ।

अपि च विभुद्रव्यसंयोगिनः परिस्पन्दवतश्च सर्वत्र स्पर्शवत्त्वाव्यभिचारेऽपि ज्ञानसुखादिनित्यद्रव्यविशेषगुणानुमितात्मसंयोगिनः मनसः कथमिव स्पर्शरहितत्वम् ? । कथं च वायवीयद्रव्यस्य महिमगुणशालिनो नियताधिष्ठानस्पार्शनत्वनियमदर्शनेऽपि त्वगिन्द्रिये

upon a competent agent, when noticed in the case of earth and the like, points to an intelligent agent, who is capable of producing them and is hitherto unknown. Just as by ignoring the place where fire is found, the time of its existence, the fuel by which it is fed, the size and other characteristics of fire, the invariable concomitance of smoke with fire alone which is responsible for its very existence is established; even so by eliminating the special characteristics of the agent, such as, the absence of lordship (*anīśvaratva*), the possession of fragmentary knowledge, the character of owning a body, of being subject to merit and demerit, and of being human, universal concomitance of an effect with an intelligent agent merely, who is competent to make it, is ascertained. Hence, there is no special feature marking off these two cases.

(Difficulties arise when it is insisted that all the special features found in the illustrative example should be found in all the cases coming under that vyāpti. For example) :—When an object, which is in conjunction with an all-pervasive substance and which possesses movement, is known without exception to be everywhere associated with the possession of touch, how can the mind[3] whose conjunction with the soul is inferred from consciousness, pleasure and other special qualities of an eternal substance, be devoid of touch (*sparśa*)? When what is composed of wind and what possesses visible magnitude is found to be invariably concomitant with the character of being the object of the sensation of touch and is also found to have a particular abode, how can the opposite character be met with in the sense of touch ?[4]

---

3. The Naiyāyika raises this objection against the Prābhākara school, and not against the Bhāṭṭa school, of Mīmāmsā ; for the former believes that manas is atomic, while the latter maintains that manas, like the *ātman*, is all-pervasive (*vibhu*). And on the Naiyāyika view that there cannot be any *samyoga* between two *vibhu-dravyas, manas cannot be in conjunction* with the soul.

4. Some entities constituted of vāyu, such as prāṇa, apāna, viyāna, udāna and samāna, dwell only in particular regions of the body. For example, prāna is said to dwell in the heart (*hṛdi*); and samāna, in the navel (*nābhi*). And the air outside is cognisable by the sense of touch. The sense organ for touch, however, has the

तद्विपर्ययः ? तैजसस्य वा रूपस्पर्शयोरन्यतरस्य वा प्राकट्यनियमेऽपि रूपोपलम्भसाधनतानुमिततैजसभावस्य चक्षुषो नियमेन तदुभयानुद्भवाभ्युपगमः ? ।

अथ कार्यदर्शनानुमितसद्भावानां तैजसादिभावेऽपि तत्तद्विशेषाणां योग्यानुपलब्धिबाधितत्वात् तदभ्युपगमेऽनेकनियमभङ्गप्रसङ्गाच्च तथाभ्युपगमः, हन्त तर्हि प्रकृतविषयेऽपि प्रसञ्जितधर्मविशेषाणामनुपलम्भबाधाविशेषादनेकनियमविघातप्रसङ्गाच्च तथाभ्युपगम इति सर्वं समानमन्यत्राभिनिवेशात् ।

दृश्यन्ते हि नीतयः—यथा, विवादास्पदं परमाण्वादि प्रेक्षावत्प्रेरितं चेष्टते, अचेतनत्वात् । यदचेतनं, तत्तथा, यथा तथाविधं कन्दुकादि । तथा विवादाध्यासिता बाह्याभ्यन्तरप्रवृत्तयः प्रकृत्युपकरणप्रत्यक्षपूर्विकाः, कार्यत्वात्, तद्वदेव ।

When either the colour (*rūpa*) or the contact (*sparśa*) of fiery objects must invariably be explicit, how could it be admitted that these two are never explicit in the eye, which is inferred to be fiery, for the reason that it is the instrument for cognising colour ?

If it be said that it is so admitted (i.e, that the eye is devoid of explicit *rūpa* or *sparśa*) for the reason that the belief in the special qualities (i.e., explicit *rūpa* or *sparśa*) appropriate to the respective cases is contradicted by effectual non-apprehension (*yogyānupalabdhi*), even though the character of being fiery is attributed to these (i.e., the eye and so forth) whose existence is inferred from a knowledge of their activity, and for the reason that on this admission (namely, that the special features found in the illustrative examples should be inferred to exist in other cases as well), there would be an end to all inference ; (it may be replied) well, if that be so even in the case under discussion it may be admitted that these qualities do not belong to the creator of the world, because the special qualities of the potter, which in your opinion would have to be attributed to the creator of the earth and the like, are likewise contradicted by non-apprehension and because such an admission would mean an end to all inductive generalisation. Thus, the two cases are in every respect similar, except your prejudice.

In fact the following arguments are met with (1) The infinitesimal atoms and so forth, the precise manner of whose activity is under dispute, act under the direction of an intelligent person ; for they are non-sentient and whatever is a non-sentient object, acts in this way ; for example, the ball and other non-sentient objects. (2) All activities, internal and external, concerning which there is difference of opinion, presuppose the perception of their material and auxiliary causes ; because, like the activities of the examples cited in the previous argument,

entire body for its adhiṣṭhāna and not merely a particular region thereof. Nor is it the object of the sense of touch.

*प्रत्यक्षं तत् प्रमेयत्वात्पदार्थत्वाद्घटादिवत् ।
एकेच्छानुविधायीदमचैतन्यात्स्वदेहवत् ॥
एकेनाधिष्ठिताः कार्यं कुर्वते सर्वचेतनाः ।
देहसम्बन्धसापेक्षकार्यकृत्त्वात्त्वगादिवत् ॥

they are effects. (3) The infinitesimal atom is perceptible ; because, like the jar, it is an object of knowledge and is an entity. (4) The world is dependent upon the will of a person ; for, like our own body, it is devoid of consciousness. (5) All intelligent persons act only under the control of a single intelligent entity (i.e., God) ; for by standing in need of contact with their bodies they enter upon their

---

* In the Chaukamba and Telugu editions the following variant reading for the text commencing after the word योग्यानुपलब्धिबाधितत्वात् and ending with तद्वदेव is suggested :—

तदभ्युपगमेऽनेकनियमदर्शनविघातप्रसङ्गाच्च पक्षधर्मताबललभ्यार्थविशेषावबोधकानेकश्रुत्यादिमानबाधप्रसङ्गाच्च समर्थकर्तृपूर्वकत्वेन घटादिषु विदितसम्बन्धनियमं कार्यत्वं क्षित्यादिषु दृश्यमानं स्वोत्पादकमदृष्टपूर्वमेव बुद्धिमत्कर्तारमद्वितीयं पुरुषधौरेयं साधयतीत्यभ्युपगन्तव्यम् । तरतमभावापन्नवैचित्र्यवत्तत्तत्कार्येषु कार्यत्वमेव तत्तदनुगुणं कर्तारमनुमापयति चेत्, महीमहीधरादिरूपजगद्गतकार्यत्वमपि तदनुगुणं कर्तारमनुमापयतीति कैमुत्यसिद्धेऽर्थे व्यर्थोऽयं निरीश्वरमीमांसकस्यात्र दुरभिनिवेशः । दृश्यन्ते ह्यस्मिन्नर्थे अन्ये च हेतवः (1) त्रैकालिकं कृत्स्नं जगत् तदनुगुणशक्त्यादिगुणगणवदायत्तस्थितिलयकं, अचिन्त्यविविधविचित्ररचनत्वात्, अतिकुशलैकायत्तस्थित्यादिकतया प्रमितचित्रप्रतिमादवत् । (2) विभूतिपदाभिधेयं कृत्स्नं एकाधेयविधेयशेषभावं, तच्छरीरत्वात्, मच्छरीरवत् ।

Except for the two new arguments which this passage sets forth at its end, it contains no substantial change. These arguments are :—

(1) The world existing at all times, the past, the present and the future, possesses a continuance and a destruction which are subject to a person endowed with a group of qualities, such as power, appropriate thereto ; because it has manifold wonderful shapes inconceivable even by the mind ; for example, pictures and dolls which are well known to have their continuance and so forth subject to a very competent person. (2) All things denoted by the expression *vibhūti* possess the characters of being supported by (*ādheyatva*), being controlled by (*vidheyatva*), and existing for the sake of (*śeṣatva*) a person ; for, in the manner of one's own body, they constitute his body.

एकप्रधानपुरुषं विवादाध्यासितं जगत् ।
चेतनाचेतनात्मत्वादेकराजकदेशवत् ॥

* * * * *

* * * * *

॥ श्रीयामुनाय नमः ॥

एतावानेवायं ग्रन्थ उपलभ्यते ।

activities, like the sense of touch and so forth. (6) The world, which is the object of all this dispute, points to a single Supreme Person; because, like a country ruled over by a supreme monarch, the world consists of sentient and nonsentient entities.

* * * * *

* * * * *

The text of Īśvara-Siddhi available is only this much.

NYAYAKULISA

Edited with Introduction and Notes

By

R. Ramanujachari

and

K. Srinivasachari

श्रीः

॥ श्रीमते रामानुजाय नमः ॥

॥ भूमिका ॥

श्रीमन्न्यायकुलिशाभिधानं प्रबन्धरत्नमिदं जयति सर्वस्वमिव श्रीभगवद्रामानुजमुनिप्रतिष्ठापितस्य विशिष्टाद्वैतसिद्धान्तस्य। प्रणेता चास्य विश्वविख्यातकीर्तेः कवितार्किकसिंहस्य, सर्वतन्त्रस्वतन्त्रस्य, श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यदेशिकमणेराचार्यो मातुलश्च**आत्रेयरामानुजगुरुः**; यस्यानितरसाधारणं वादाहवकौशलमध्यक्षितवद्भिस्तदानीन्तनबुधवरैर्वितीर्णं प्रशस्तिनाम ' वादिहंसाम्बुवाह ' इति ।

आचार्यवर्योऽयं श्रीभगवद्रामानुजमुनेरन्तरङ्गशिष्यस्य ' यतीन्द्र माहानसिक ' इति ' घटाम्बु ' इति च आचार्यदास्यविशेषनाम्ना विश्रुतस्य आत्रेयस्य **प्रणतार्तिहराचार्यस्य** नप्ता, **रामानुजाचार्यस्य** पौत्रः, **श्रीपद्मनाभाचार्यस्य** पुत्रश्चेति—

' दुर्मोचोद्भटकर्मकोटिनिबिडोऽप्यादेशवश्यः कृतः
बाह्यैर्नैव विमोहितोऽस्मि कुदृशां पक्षैर्न विक्षोभितः।
यो **माहानसिको** महान् यतिपतेर्नीतश्च तत्पौत्रजा-
नाचार्यानिति रङ्गधुर्य ! मयि ते स्वल्पावशिष्टो भरः, ॥ '

इति **श्रीमन्निगमान्तमहादेशिक**सूक्त्या अन्यैश्च सम्प्रदायवचनैस्स्फुटमवगम्यते ।

' नमो रामानुजार्याय वेदान्तार्थप्रदायिने ।
आत्रेयपद्मनाभार्यसुताय गुणशालिने ॥ '

इति सम्प्रदायागतं वचनमप्यस्य पद्मनाभार्यः पितेति सुस्पष्टमवबोधयति । अयमाचार्य एवात्र प्रतिवादमन्ते स्वपितृपादनामधेयं श्रीपद्मनाभार्य इति निर्दिशति ।

---

१. न्यासतिलके—श्लो 9.

'चैत्रार्द्रासम्भवं काञ्च्यां रङ्गराजगुरोस्सुतम् ।
सुप्रतिष्ठांशमात्रेयं रामानुजगुरुं भजे ॥'

इति सम्प्रतिपन्नवचनान्तरदर्शनादेतत्पितू रङ्गराजार्य इति नामान्तरमप्यस्तीति विज्ञायते ।

गुरुरसौ स्वपितुरात्रेयरङ्गराजाचार्यस्य सकाशान्मन्त्रमन्त्रार्थान्, वात्स्यवरदगुरो[1]स्सकाशाच्छ्रीभाष्यादिकांश्च ग्रन्थानध्यगीष्टेत्यविगीता सम्प्रदायसरणिः ।

सर्वेष्वपि तन्त्रेषु निराबाधं पन्थानमवगन्तुमलङ्कर्मीणोऽसौ स्वाचार्यवरदगुरोरादेशेन प्रियभागिनेयस्य श्रीमद्वेङ्कटनाथस्य सकलाः कला उपदिश्य तमेतं विंशाब्द एव विश्रुतनानाविधविद्यमकरोत् । अयमर्थः—

'श्रीमद्भ्यां स्यादसावित्यनुपधि वरदाचार्यरामानुजाभ्यां
सम्यग्दृष्टेन सर्वं सह निशितधिया वेङ्कटेशेन क्लृप्तः ।'

इति **अधिकरणसारावलीग्रन्थो**पक्रमश्लोकेन,

'श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ।'

इति **तत्त्वमुक्ताकलापप्रारम्भसूक्त्या, मीमांसापादुको**पक्रमगतेन

'यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्य-
त्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थमग्राहि शास्त्रम् ।
तं विष्वग्भेदविद्यास्थितिपदविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुजगुरुमनघं **वादिहंसाम्बुवाहम्** ॥'

---

1. भाषायामस्य நடாதூர் அம்மாள் इति प्रसिद्धिः.

इति मङ्गळपद्येन ' विंशत्यब्दे विश्रुतनानाविधविद्य ' इति **सङ्कल्पसूर्योदय**वाक्येन च तत्र तत्र स्फुटमवगम्यते ।

अस्य च ' अप्पिळ्ळार् ' इति भाषाव्यवहारोऽपि जागर्ति । अदसीयं सकलासु कलासु विलक्षणं वैचक्षण्यं साक्षात्कृतवन्तस्तदानीन्तना महान्तः ' श्रीभाष्यकारप्रियशिष्यः ' पिळ्ळान् ' इति प्रसिद्धः कुरुकेशः स एव वासावित्युत्प्रैक्षिषत । ततः प्रभृतीदं प्रशस्तिनाम आसीदिति तत्त्वविदां साम्प्रदायिको निर्णयः ।

तस्यैतस्य वादिहंसाम्बुवाहस्य प्रपितामहानां प्रभावमेवं वर्णयन्ति साम्प्रदायिकाः । कदाचिच्छ्रीभाष्यकारस्य **रामानुजमुने**र्भिक्षावसरे विषसम्मिश्रान्नदानेन तं लोकान्तरं प्रापयितुं केचिच्छठाः प्रायतन्त । तामेतां तेषां प्रवृत्तिमुपलभ्य ससंभ्रमं श्रीभाष्यकारगुरवस्तत्र समागताः । शिष्यकोटिभिः परिवृतं रामानुजमुनिं जीवन्तं पश्यन्तोऽमन्दमानन्दमलभन्त । तत्र चासङ्ख्येयेषु शिष्यजनेषु प्रणतार्तिहरार्यस्य श्रीभाष्यकारशरीरेऽतिशयितं प्रेमातिशयं बहुधा परीक्ष्य तमेतं तस्यान्तरङ्गकैङ्कर्येषु न्ययूयुजन् । ततः प्रभृति श्रीभाष्यकारस्य घटतीर्थाहरणादिकमन्तरङ्गकैङ्कर्यं कुर्वाणोऽयं ' घटाम्बु ' इति बिरुदमलभत । त एते वादिहंसाम्बुवाहस्य प्रपितामहाः श्रीमत्प्रणतार्तिहराचार्याः श्रीभाष्यकारस्य प्रियशिष्यास्स्वीयेन पाण्डित्यप्रकर्षेण ' वेदान्तोदयन ' इति प्रसिद्धिमासादितवन्तो विशिष्टाद्वैतसम्प्रदायं बहुधा तत्र तत्र प्रवर्तयन्तो व्यराजन्त इति । अत एव श्रीमन्निगमान्तमहादेशिकाः—

' इति यतिराजमहानसपरिमळपरिवाहवासितां पिबत ।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसम्प्रदायसुधाम् ॥ '

इति तस्यैतस्य सम्प्रदायस्य यतिराजमहानसपरिमळवासितत्वेन बुधजननिषेव्यतां वर्णयन्ति ।

एतस्यैव चाचार्यवर्यस्यानवद्ये वंशे कृतावतारास्सुप्रसिद्धवैभवा **गोपालार्यमहादेशिकाः** कुम्भघोणे विरचितनिवासाश्श्रीमतां ज्ञानानुष्ठानवैराग्यशेवधीनां ' **साक्षात्स्वामी** '

इति जगति विख्यातानां न्यासविद्यादर्पणश्रीतत्त्वसिद्धाञ्जनादिग्रन्थनिर्माणेन विशिष्टाद्वैत-सिद्धान्तस्य बहूपकृतवतां श्रीमद्वेदान्तरामानुजमहादेशिकानां वरिवस्यया अधिगतसकल-वेदान्ततत्त्वार्थाः, पाण्डित्यानुष्ठानवैराग्यादिभिराचार्यताप्रयोजकैर्गुणगणैः 'अपरोऽयं निगमान्तमहादेशिकस्यावतारः' इति तदानीन्तनैर्बुधवरैरुत्प्रेक्षिताः, तत्त्वार्थाधिजिगमिषया शिष्यवृत्त्या स्वीयं पादमूलमासेदुषां वेदान्तरामानुजमहादेशिकादीनां त्रयाणामुत्तमाश्रमिणां वेदान्तार्थानुपदिश्य तन्मुखेन विशिष्टाद्वैतसम्प्रदायमविच्छिन्नमद्य यावत्प्रवर्तितवन्तो, निक्षेपचिन्तामण्यादिग्रन्थानां विशिष्टाद्वैतसिद्धान्तसमर्थनपराणां रचयितारश्च, गुरुपङ्क्तिहारयष्टेरनर्घं नायकरत्नमिव विराजन्ते[1] । **विश्वगुणादर्शादि**प्रबन्धनिर्मातारः श्लेषयमकचक्रवर्तिनः **श्रीवेङ्कटाध्वरिणो**ऽप्यस्यैवाचार्यमणेर्वंशे समजनिषतेति तत्सन्ततिगता वंशावलिरवबोधयति ।

भगवतः श्रीभाष्यकारादनन्तरं प्रणतार्तिहराचार्यस्तत्पुत्रपौत्रप्रपौत्राश्चेति चत्वार एते आत्रेया महानुभावा आचार्यपङ्क्तिमलङ्कुर्वन्तीति नेदं सम्प्रदायज्ञानां पुरस्तादिदम्प्रथममावेदनीयम् । तस्यैतस्य वादिहंसाम्बुवाहस्य वरदार्यो रङ्गराजार्य इति पुत्रद्वयमासीदिति तत्सन्ततिसमुद्भवास्समुदाहरन्ति ।

'न्यायकुलिशादिग्रन्थत्रयकर्तारः' इति तद्वंश्यैस्तत्र तत्र पठ्यमानं तदीयं प्रशस्तिपत्रमावेदयत्यन्यच ग्रन्थद्वयं नूनमनेन विरचितमिति । परन्तु किं तद्ग्रन्थद्वयमिति नाद्य यावन्निश्चेतुं शक्यते । हन्त—महदिदं विषादस्थानम् ! यत् श्रीभगवद्रामानुजसिद्धान्तस्य अथवा सर्वस्य सिद्धान्तस्य यद्बहवः प्राचामाचार्याणां वाग्विस्तरा एतर्हि श्रोतुमपि दुर्लभतां गमिता इति ।

---

(१) तानेतानाचार्यानधिकृत्य श्लोकोऽयमनुसन्धीयते—
यः श्रीशो भुवि वादिहंसजलमुग्वंशेऽवतीर्णोऽखिलान्
श्रीकृष्णाध्वरिदेशिकात्समवितुम् गोपालसूर्यात्मना ।
शिष्यैः सूरिगणैः श्रितः सुविमलैर्वेदान्तरामानुज-
श्रीरङ्गशरमानिवासयतिराण्मुख्यैस्स जीयाद् गुरुः ॥

श्रीमन्निगमान्तमहादेशिकाः 'वादिहंसाम्बुवाहाश्शुकवन्मामशिक्षयन्' इति 'तैर्मम हृदि लिखितं पत्रे लिखामि' इति च वर्णयन्तस्स्वीयां निरतिशयां गुरुभक्तिं प्रकाशयन्ति ।

विस्मरणार्हस्य दुरवगाहस्याप्यर्थस्याक्लेशेन शिष्यजनहृदयेषु समुचितैरुदाहरणैर्दृढप्रतिष्ठापनेऽस्य वादिहंसाम्बुवाहस्यानितरसाधारणं नैपुण्यमासीदिति नेदमविदितं **रहस्यत्रयसारा**दिग्रन्थाध्येतॄणां विदुषाम् । तत्र द्वित्राण्युदाहरणानि प्रदर्श्यन्ते—

'अग्रतः प्रययौ रामस्सीता मध्ये सुमध्यमा
पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह ॥

इति श्रीमद्रामायणपद्यमुदाहृत्य श्लोकोऽयं प्रणवस्य यथाक्रमं परतत्त्वपुरुषकारचेतनप्रतिपादनपरस्यार्थानुसन्धाने सुकर उपायः । तथा अर्जुनरथः पुरतस्सारथिं परमात्मानं पश्चादर्जुनञ्च चेतनं बिभ्राणः प्रणवार्थानुसन्धानस्याक्लिष्ट उपाय इति वादिहंसाम्बुवाहोपदेश इति वेदान्तगुरवः । काव्यरसिकता कथमेषामुपयुज्यत इति सहृदयाः परामृशन्तु । तथा ये भगवतः परत्वमात्रमालोच्य सौलभ्यमजानन्तस्तस्माद्दूरीभवितुं प्रयतन्ते, तेभ्यो 'नराधमाः' इति गीताचार्यैर्निन्दितेभ्यस्सौलभ्यमात्रवेदिनो ये गोपीवद्विवेकशून्या अपि

---

(१) *இப்படி.........கீழும் மேலுமுள்ள பாசுரங்களெல்லாம் வேதாந்தோதயன ஸம்பிரதாயமான மடப்பள்ளிவார்த்தையை ஆசார்யன் பக்கலிலே தாங்கேட்டருளினபடியே கிடாம்பியப்புள்ளாரடியேனைக் கிளியைப் பழக்குவிக்குமாப்போலே பழக்குவிக்க அவர் திருவுள்ளத் திலிரக்கமடியாகப் பெருமாள் தெளியப்பிரகாசிப்பித்து மறவாமற்காத்துப் பிழையறப் பேசுவித்த பாசுரங்கள்.* **रहस्यत्रयसारे.**

வெள்ளைப்பரிமுகர் தேசிகராய் விரகாலடியோம். உள்ளத்தெழுதிய தோலையிலிட்டனம். **रहस्यत्रयसारे—निगमनाधिकारे.**

(२) *இதில் ப்ரதமபதத்தில் அர்த்தங்களை அர்ஜுனரதத்திலும்,* **'अग्रतः प्रययौ रामः'** *என்ற சுலோகத்திலும் கண்டு கொள்வது.........இது ....அர்த்தாநு ஸந்தானத்திற்குக் குறிப்பாக வப்புள்ளாரருளிச்செய்த விரகு.* **रहस्यत्रयसारे—प्रधानप्रतितन्त्राधिकारे.**

सन्तो भगवन्तमुपजिगमिषन्ति, ते परमास्तिकाः श्लाघ्यतमा इति वादिहंसाम्बुवाहानामुक्तिरिति निगमान्तमहादेशिकाः[1]।

एतस्य देशकालनिर्णयश्च शिष्यप्रशिष्यक्रमागतस्सुगम एव। तथा हि—एतद्भागिनेयस्य शिष्यस्य च **श्रीमद्वेदान्तदेशिकस्य** क्रैस्तववर्षे सप्तत्युत्तरद्विशताधिकसहस्रतमे (1270) आविर्भाव इति विमर्शकानां निर्णयः। अतः क्रैस्तवत्रयोदशशतकेऽस्यापि स्थितिरासीदिति निश्चीयते। 'चैत्रार्द्रासम्भवं काञ्च्याम्' इत्यादिभिर्वचनैश्श्रीकाञ्चीक्षेत्रे विक्रमवर्षचैत्रार्द्रायामस्याविर्भाव इति सम्प्रदायक्रमागतो निर्णयः।

तस्यैतस्य प्रज्ञानिधेराचार्यस्य स्वप्रतिभाद्रविणनिक्षेपायमाणं **न्यायकुलिशाभिधानं** निबन्धनमिदमेतत्प्रियशिष्येण वेदान्तगुरुणा न्यायपरिशुद्ध्यादौ तत्र तत्रोदाहृतमास्ते।

यथा **न्यायपरिशुद्धावनुमानाध्याये** केवलव्यतिरेकिभङ्गे[2] 'उक्तञ्च **न्यायकुलिशे** स्वप्रकाशवादे **श्रीमद्रामानुजाचार्यैः**—'न च सिद्धान्तिनोऽयं प्रसङ्गः; केवलव्यतिरेकिप्रामाण्यानभ्युपगमात्' इति। एवमत्रैवाध्याये चतुर्थाह्निके 'पाणिपादादिषु प्रत्येकसमुदायाहंत्वविकल्पानुपपत्त्यादयश्चास्मदाचार्यैर्**न्यायकुलिशे** प्रपञ्चिताः प्रस्पष्टमनुसन्धेयाः'[3] इति च। **न्यायसिद्धाञ्जने** बुद्धिपरिच्छेदेऽपि 'उक्तञ्च न्यायकुलिशे। संयोगस्तु प्रसरणवैभवादिप्रतिपादकशास्त्रबलादाश्रित इति[4]।'"

यदेव यावदेव श्रीमन्निगमान्तगुरुणा क्वचित्क्वचिदुदाहृतवाक्यशकलं तदतिरिक्तं कियदपि न केवलमस्माकं व्याख्यातॄणामपि पूर्वेषां दृष्टिविषयभूतं नासीदियन्तमपि कालम्।

---

(१) இவ்விடத்தில் ஸர்வேசுவரனுடைய பரத்வமாத்திரத்தை யறிந்தகலுகையாலே நாஸ்தமனென்று பேர்பெற்ற பிறந்து கெட்டானிற் காட்டில் இடைச்சிகளைப் போலே விவேகமில்லையேயாகிலும் ஸௌலப்யத்தையறிந்து அந்நலனுடையொருவனை நணுகுமவனே பரமாஸ்திகனென்றப்புள்ளாரருளிச்செய்யும் பாசுரம். **रहस्यत्रयसारे—परिकरविभागाधिकारे।**

(२) **न्यायपरि** P. 66

(३) „ P. 185

(४) **न्यायसिद्धा.** P. 269.

अत इदं निबन्धनं नाममात्रशेषमासीदिति मन्यमानानां विद्याव्यसनिनां दुनोति स्म मानसम् । तदिदानीं 'यदा मृतस्य संप्राप्तिः' इत्युक्तरीत्या लब्धप्रचारमस्माकं परमं प्रीणयति मनः । अत्र न केवलं विशिष्टाद्वैतिनां, सर्वेषामपि वैदिकमतस्थानामुपजीव्यास्सिद्धार्थव्युत्पत्तिसमर्थनस्वतःप्रामाण्यवर्णनादयो बहवो विषया उपलभ्यन्ते ।

एतद्ग्रन्थस्यातीव दुरवगाहत्वं समुचितोपकारविशेषश्च प्रबन्धादौ ग्रन्थकृतैव प्रतिपाद्यते । यथा—

'अभेद्यं सर्वेषां हतकुमतिगोत्रप्रसरणं
यतीन्द्रादेशैकप्रवणसुमनस्त्राणनिपुणम् ।

कठोरेष्वात्रेयान्वयतिलकरामानुजकृतं
कथायुद्धेष्वाविष्कुरुत निशितं न्यायकुलिशम्' ॥

इति । अतोऽत्र दुर्ग्रहाणां वादार्थानां सर्वेषां सुग्रहत्वाय वादार्थसारस्सङ्गृह्यते । अस्मिन्निबन्धने संहत्य त्रयोदश वादाः ।

तत्र प्रथमे सिद्धार्थव्युत्पत्तिसमर्थनवादे वेदान्तवाक्यानां सिद्धे ब्रह्मणि प्रामाण्यसिद्ध्यर्थं सर्वशब्दानां कार्य एव व्युत्पत्तिं वदन् प्राभाकरो व्युदस्यते ।

स ह्येवम्मनुते—सिद्धे व्युत्पत्तिर्न भवितुमर्हति । शिक्षको जनः पित्रादिः कश्चित्कालं अङ्गुलिनिर्देशपूर्वकं तत्तच्छब्दांस्तेषु तेष्वर्थेषु प्रयुङ्क्ते । चेष्टापरिज्ञानवान् व्युत्पित्सुर्व्युत्पादकानां प्रवृत्तिं व्युत्पादनार्थां जानाति । ततश्चेष्टामन्तरेण केवलशब्देनापि स्वस्यार्थप्रतिपत्तिं दृष्ट्वा शब्दार्थयोस्संबन्धान्तरादर्शनात्परिशेषाद्बोध्यबोधकभावसम्बन्धेनैव 'अयं शब्द इममर्थं बोधयति' इति व्युत्पद्यत इति हि सिद्धार्थे व्युत्पत्तिर्वक्तव्या । सा तु न सङ्गच्छते । अङ्गुलिनिर्देशस्थले शब्दोऽर्थवद्बोध्यकोटौ निविशते ? उत निर्देशवद्बोधककोटौ? इति विशये, निर्देशस्य बोधकताया उभयसम्प्रतिपन्नत्वात्तेनैव प्रतिपन्ने वस्तुनि शब्दस्याप्युपायत्वकल्पने प्रयोजनाभावादर्थवद्बोध्य एव शब्दः, न तु बोधक इतिनिर्णीयते ।

किञ्चाङ्गुलिनिर्देशेन प्रत्येकपदार्थव्युत्पादने शब्दानां प्रत्येकमर्थेषु सङ्गतिग्रहादितरान्विताथे एव शक्तिरिति सिद्धान्तोऽपि विरुद्ध्येत। अतो 'गामानय'. इत्यादिवृद्धव्यवहारेण व्युत्पत्तिबीजभूतेन कार्यान्वित एव शक्तिग्रहात्सिद्धार्थे शक्तिर्नास्तीति।

सिद्धान्तस्तु—व्युत्पादकस्य प्रयोजनाभिसन्धिनैव चेष्टया सह शब्दप्रयोगः। तत्रार्थस्य बोध्यत्वे हानोपादानादिरूपं प्रयोजनमस्ति। शब्दस्य बोध्यत्वे तन्नास्ति। अतश्शब्दस्य बोध्यत्वं न युक्तम्। यथा व्युत्पादनाय पर्यायशब्दप्रयोगो लोके दृश्यते, तथा प्रकृते द्वयोर्बोधकत्वेऽपि सह प्रयोग उपपद्यते।

अन्विताभिधानस्यापि न विरोधः। प्रथममर्थस्याभिधानं नास्ति। अपि तु प्रत्येकमर्थानां स्मरणमात्रम्। अथ आकाङ्क्षायोग्यतादिपरामर्शः। अनन्तरमेव संहतानां पदानां परस्परस्मारितार्थान्वितस्वार्थाभिधायकत्वम्। यथा—सिद्धपरत्वे विशेष्यपदं विशेषणपदस्मारितार्थान्वितस्वार्थाभिधायि, विशेषणपदं विशेष्यपदस्मारितार्थान्वितस्वार्थाभिधायि; एवं कार्यपरत्वे कारकपदं क्रियान्वितस्वार्थाभिधायकम्, क्रियापदं कारकान्वितस्वार्थाभिधायकमिति विभाग इति—

इति सिद्धार्थव्युत्पत्तिसमर्थनवादः॥

अथ स्वतः प्रामाण्यवर्णनवादे द्वितीये वेदस्य स्वतःप्रामाण्यसिद्ध्यर्थं **कुमारिल**मतानुसारेण ज्ञानानां स्वतःप्रामाण्यं निर्णीयते। अत्र मुख्यः पूर्वपक्षी **नैयायिकः**। अस्यायमाशयः—

अन्वयव्यतिरेकाभ्यां गुणाधीनं प्रामाण्यं दोषाधीनमप्रामाण्यञ्च संवादिविसंवादिप्रवृत्तिभ्यामनुमीयते इति न तयोरुत्पत्तौ ज्ञप्तौ वा स्वतस्त्वम्। विषयप्रकाशकत्वं परं स्वभावः। तत्तु शिंशुपापलाशादिषु वृक्षत्वमिव प्रमाणाप्रमाणयोः साधारणम्। शिंशुपात्व-

पलाशत्वादिवत् प्रामाण्याप्रामाण्येऽसाधारणे। शिंशुपायां पलाशत्वस्य, पलाशे शिंशुपात्वस्य च निवृत्तावपि वृक्षत्वानिवृत्त्या यथा शिंशुपात्वाद्यपेक्षया वृक्षत्वमतिरिक्तस्सामान्यधर्मस्तद्वदेव प्रमाणज्ञानेऽप्रामाण्यस्य, अप्रमाणज्ञाने प्रामाण्यस्य च, निवृत्तावप्यर्थपरिच्छेदकत्वरूपस्य ज्ञानत्वस्यानिवृत्तेरनधिगताबाधितार्थप्रकाशकत्वरूपप्रामाण्यात् केवलार्थप्रकाशकत्वरूपं ज्ञानत्वमतिरिक्तं सामान्यधर्म इति निश्चीयते। प्रामाण्यनिश्चयश्च गुणज्ञानात्, संवादज्ञानात्, अर्थक्रियाकारित्वज्ञानाद्वा; न तु स्वतः। अप्रामाण्यनिश्चयस्तु दोषज्ञानात्। स्वतः प्रामाण्यवादिमते प्रामाण्यस्य व्यवसायात्मकज्ञानग्राहकेणानुमानेनैव व्यवसायवद्ग्रानाङ्गीकारेण प्रामाण्यसंशयो न स्यात्; व्यवसायनिश्चयस्यैव प्रामाण्यनिश्चयरूपत्वात्। वेदस्थलेऽपि गुणात्प्रामाण्यस्योत्पत्तिः। अप्रामाण्यहेतोर्वक्तृदोषस्याभावान्नाप्रामाण्यं शङ्कास्पदमपि। अतः प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वे सति तद्विशेषत्वात्; अप्रमावत् इति॥

राद्धान्तस्तु—ज्ञानानां प्रामाण्यं स्वत एव, न तु गुणात्। तथा हि—विशेषणविशेष्यतदुभयसम्बन्धात्मकं यथावस्थितार्थप्रकाशकत्वमेव प्रामाण्यम्। तच्च 'अयं घटः' इति प्रमास्थल इव 'इदं रजतम्' इति भ्रमस्थलेऽपीदमाद्यंशे वर्तते। अतो वह्नेर्दाहकत्वमिव स्वाभाविकं तत्। ईदृशं प्रामाण्यमेव ज्ञानत्वम्; न त्वतिरिक्तम्। अतिरिक्तत्वेऽपि ज्ञानसामान्यवृत्त्येव प्रामाण्यं ज्ञानत्वव्यञ्जकम्। यथा गोसामान्यवृत्त्येव सास्नापुच्छकर्णशृङ्गादिसंस्थानं गोत्वव्यञ्जकम्; यथा वैतेषामन्यतमापायेऽपि शेषं संस्थानं गोत्वं व्यञ्जयति, तथा भ्रमस्थले विशेषणविशेष्ययोस्संसर्गाभावेऽपि शेषांशेन ज्ञानत्वव्यक्तौ न दोषः। अतो ज्ञानत्वव्यञ्जकत्वात्प्रामाण्यस्य गोत्वव्यञ्जकसंस्थानस्येव साधारणत्वमुपपद्यते। प्रामाण्ये ज्ञानत्वव्यञ्जकताया अनभ्युपगमे ज्ञानत्व एव मानाभावः। निस्स्वभावत्वं ज्ञानस्य प्रसज्येत।

शिंशुपापलाशादिविशेषेषु वृक्षत्वमिव प्रमाणाप्रमाणसाधारणं ज्ञानत्वम्। तदवान्तरधर्मौ प्रमाणत्वाप्रमाणत्वे इति वक्तुं न शक्यते। दृष्टान्ते हि शाखास्कन्धादिसामान्यरूपं तत्तदसाधारणं पर्णस्पर्शादिभेदवत्त्वञ्चेति रूपद्वयमुपलभ्यते। तत्र सामान्यरूपेण

शाखादिना वृक्षत्वं, असाधारणरूपेण पर्णादिना शिंशुपात्वादिकञ्चाभिव्यज्यताम् । ज्ञाने तु ज्ञानत्वव्यञ्जकसामान्याकारातिरेकेण प्रमाणत्वव्यञ्जकाकारविशेषो नोपलभ्यते । अतो ज्ञानत्वप्रमाणत्वयोस्सामान्यविशेषरूपत्वं नाभ्युपगन्तुं क्षमम् ।

प्रामाण्यग्रहोऽपि न गुणज्ञानादिना । अपि तु स्वत एव । ज्ञानेन हि विषये ज्ञातताख्यो धर्म उत्पाद्यते । स एवार्थप्रकाश इत्युच्यते । तज्जनकत्वमेव ज्ञानस्यार्थप्रकाशकत्वरूपं प्रामाण्यम् । अनया कार्यभूतया ज्ञाततया कारणभूतं ज्ञानमनुमीयते । ज्ञाततालिङ्गकानुमानेनैव व्यवसायगतप्रामाण्यस्यापि ग्रहः । व्यवसायविषयकज्ञानग्राह्यत्वमेव स्वतो ग्राह्यत्वं प्रामाण्यस्य । एवमपि प्रामाण्यसंशयस्य न विरोधः । प्रामाण्यस्य ह्यपवादोऽप्रामाण्यम् । तच्छङ्कया प्रामाण्यसंशयः । अपवादशङ्काकळङ्करहितमेव प्रामाण्यज्ञानं प्रामाण्यसंशयविरोधि ; न तु प्रामाण्यज्ञानमात्रम् । अप्रामाण्ये निरस्ते चौत्सर्गिकं प्रामाण्यमवतिष्ठते ; यथा बीजस्याङ्कुरोत्पादनसामर्थ्यं स्वाभाविकं निश्चितमप्यग्निसंसर्गादिदोषसंशयात्संशयविषयो भवति ; दोषसंशये निरस्ते च स्वाभाविकसामर्थ्यनिश्चयः । नैतावता बीजस्य अङ्कुरोत्पादनसामर्थ्यस्य स्वभाविकत्वमपैति ; तद्वदिहापि । अत उदाहृतमनुमानं हेत्वसिद्ध्यादिदोषग्रस्तमिति ॥

इति स्वतःप्रामाण्यवर्णनवादो द्वितीयः ॥

अथ तृतीये ख्यातिनिरूपणवादे तार्किकाभिमता अन्यथाख्यातिः परमसिद्धान्तभूतयथार्थख्यातिश्च समर्थ्यते । पूर्वपक्षिणो **गुरुमतानुसारिणः**, अनिर्वचनीयख्यातिवादिनोऽ**द्वैतिनश्च** । तत्र गुरुमतानुसारिणामयमाशयः—शुक्तिं दृष्ट्वा इदं रजतमिति ज्ञानमन्यथाख्यातिरिति न वक्तुं शक्यते ; तत्र रजतेन सहेन्द्रियसन्निकर्षाभावात् । किन्तु इदमिति पुरोवर्तिविषयकानुभवः । रजतमिति च पूर्वानुभूतरजतविषयकस्मृतिमात्रम् । स्मृतित्वे देशान्तरोल्लेखेन तत्र रजतमिति हि ज्ञानाकारेण भवितव्यमिति नाशङ्कनीयम् : दोषव-

शाद्देशान्तरानुल्लेखोपपत्तेः । रजतत्वस्य पुरोवर्तिभास्वरद्रव्यनिष्ठतया भानाभावेऽपि स्मर्यमाणरजतभेदाग्रहात्प्रवृत्त्युपपत्तिरिति । अत्रान्यथाख्यातिवादिनः—

'वादिनां विमतेर्बाधाद्व्यवहाराद्भ्रमोक्तितः ।
स्वारस्याच्चान्यथाख्यातिः प्रसिद्धा नापनीयताम् ॥'

इति वदन्ति । तथा हि—१. कश्चित् शब्दो नित्य इति वदति, अन्यश्च अनित्य इति । तयोरन्यतरोऽन्यथा गृह्णातीति वक्तव्यम् । तत्रापि ज्ञानद्वयाभ्युपगमेऽधिकरणभेदेन नित्यत्वानित्यत्वयोर्विरोधाभावाद्विवादविलयप्रसङ्गः । अतो वादिनां विवादकार्यकारणतयान्यथाख्यातिसिद्धिः ।

२. एवं इदं रजतमिति शुक्तिकां रजतमित्यध्यस्य समनन्तरं स एव सम्पन्नपरिशुद्धसामग्रीको नेदं रजतमिति जानाति । तत्र नेदं रजतमिति बाधकज्ञानमन्यथाख्यातिरूपशुक्तिकारजतज्ञानस्य बाध्यस्याभावे न बाधकं भवति । तस्माद्बाध्यबाधकाभावान्यथानुपपत्त्या अन्यथाख्यातिसिद्धिः ।

३. एवं व्यवहारात्—स च व्यवहारो भेदाग्रहे स्वरूपज्ञानमात्रेण न भवितुमर्हति । नेयं शुक्तिरिति शुक्तिस्फुरणदशायामपि शुक्तिभेदाग्रहस्य स्वरूपज्ञानस्य चाङ्गीकार्यत्वात् । तत्र शुक्तौ शुक्तिभेदग्रहेऽन्यथाख्यातिस्वीकारापत्तेः । अतश्शुक्तिभेदाग्रहात् नेयं शुक्तिरिति ज्ञानदशायामपि शुक्तिव्यवहारोदयप्रसङ्गः । अतो व्यवहारान्यथानुपपत्त्या अन्यथाख्यातिसिद्धिः ।

४. एवं भ्रान्तिशब्दो ज्ञानविशेषगोचरो भेदाग्रहेऽभावरूपे न भवति । अन्यथा सुषुप्तावपि भ्रान्तिशब्दः प्रयुज्येत । मिथ्याज्ञानं भ्रान्तिरिति च पर्यायौ । अतोऽप्यन्यथाख्यातिसिद्धिः ।

५. स्वारस्याच्च—शुक्तिं दृष्ट्वा इदं रजतमिति मे मतिरासीदिति विशिष्टज्ञानं प्रत्यक्षमवसीयते । नत्वसंसर्गो नानुभूत इति । असंसर्गाग्रहपक्षे तथैव किल ज्ञानाकारेण भाव्यम् । तस्माल्लोकप्रमितिस्वारस्याच्चान्यथाख्यातिसिद्धिरिति ।

अनिर्वचनीयख्यातिवादिनस्त्वेवमाहुः। स्वयंप्रकाशा ज्ञप्तिरेव परमार्थः। तस्या निर्धर्मकत्वादर्थेन सह विषयविषयिभावो नोपपद्यते। अर्थश्च सदसदनिर्वचनीयः। असच्चेन्न प्रतीयेत, सच्चेन्न बाध्येत। अतः ख्यातिबाधान्यथानुपपत्त्या अनिर्वचनीयत्वरूपं मिथ्यात्वमर्थस्य। ज्ञानज्ञेययोरध्यासाधिकरणत्वव्यतिरेकेण न सम्बन्धः कश्चिदपीति।

अत्र सिद्धान्तः—पारोक्ष्यापारोक्ष्यानुभवत्वस्मृतित्वादिधर्माणामुपलब्धेर्ज्ञानं न निर्धर्मकम्। अतो विषयविषयिभावोपपत्तिः। प्रतीत्या सत्त्वं बाधेनासत्त्वञ्चेति संभवात्, नार्थस्यानिर्वचनीयत्वसिद्धिः। अर्थस्य पारमार्थ्यं विना रूपान्तरं नास्ति। उत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वम्। विश्वमपि पञ्चीकृतभूतारब्धम्। अतः सर्वत्र सर्वं यथासंभवं विद्यते। शुक्तावपि रजतांशो मनाग्विद्यते। शुक्त्यंशस्तु तत्र भूयान्। तत्र शुक्तिं दृष्ट्वा इदं रजतमिति शुक्तिभूयस्त्ववैकल्येन ग्रहः। नेदं रजतमिति तु शुक्तिभूयस्त्वसाकल्येन ग्रहः। तत्र नेदं रजतमिति शुक्तिभूयस्त्वे गृहीते, इदं रजतमिति शुक्तिभूयस्त्ववैकल्यज्ञानेन जायमाना प्रवृत्तिर्बाध्यते। बाध्यप्रवृत्तिकत्वमेव इदं रजतमिति ज्ञानस्य नेदं रजतमिति ज्ञानेन बाध्यत्वं नाम। तस्मात्सर्वं ज्ञानं यथार्थमिति।

इति ख्यातिनिरूपणवादस्तृतीयः॥

चतुर्थे स्वयंप्रकाशवादे **भाट्टमुरारिमिश्रनैयायिकानां** मतं निरस्य ज्ञानानां स्वयंप्रकाशत्वं समर्थ्यते। तत्र **भाट्टाः**—ज्ञानमतीन्द्रियम्। अयं घट इति ज्ञानेन विषये घटे ज्ञातताख्यः कश्चिद्धर्म उत्पाद्यते। स एव प्रकाश इत्युच्यते। तेन कार्यभूतेन प्रकाशेन कारणभूतं ज्ञानमनुमीयते। अतो ज्ञाततालिङ्गकानुमितिगम्यत्वाज्ज्ञानस्य न स्वयंप्रकाशत्वमिति वदन्ति।

मिश्रादीनामयमाशयः—यथा वा चक्षुश्शक्तिविशेषाच्चाक्षुषज्ञाने विशेषमभ्युपेत्य रूपादावेव ज्ञातताख्यधर्मश्चाक्षुषज्ञानेनोत्पाद्यत इत्युच्यते; न तु सत्यपि संयुक्तसमवा-

NĪTIMĀLĀ

By

Nārāyanārya

Edited with Introduction and Notes

By

R. Ramanujachari

And

K. Srinivasachari

श्रीः

॥ श्रीमते रामानुजाय नमः ॥

॥ नारायणार्यैः अनुगृहीता नीतिमाला ॥

॥ प्रथमो वादः ॥

वस्त्वाविरस्तु पद्माक्षं मम श्रीधरमच्युतम् ।
अबुद्ध्यधीनसन्दर्भभारतीमूर्धभूषणम् ॥

उन्मीलयन्ति चैतन्यचक्षुर्येऽहेतुकं मम ।
हृदि [1]सन्निदधीरंस्ते गुरवः करुणाश्रयाः ॥

वेलां लीलाविभूतिं प्रबलमितिशिलाराशिभिः पूर्वक्लप्तां
ब्रह्माम्भोधेर्विषाणैः कुनयकुलमयैर्भेत्तुमुद्युञ्जते ये ।
तान्वादीभान्सुतीक्ष्णैर्नयकुलकरजैः पाटयल्लक्ष्मणार्यः[2]
पञ्चास्यो रङ्गधामक्षितिधरनिलयो मङ्गळं मे विधत्ताम् ॥

मुनीन्द्रपारिजातोत्थसुनीतिकुसुमैरहम् ।
मालां ग्रथ्नामि रङ्गेशवरिवस्या[3]विधित्सया ॥

पौर्वापर्यस्य नियमः कर्मब्रह्मविचारयोः ।
तथा वेदान्तवाक्यानामप्रामाण्यनिराक्रिया ॥

१. सन्निदधुस्ते मे—पा०.

२. लक्ष्मणाख्यः—पा०.

३. परिचर्या—पा०.

विवर्तपक्षक्षपणं परिणामनिराकृतिः ।
शक्तिविक्षेपभङ्गश्च ब्रह्मणो निर्णयस्तथा ॥

निर्णयः पुरुषस्यापि विधिरूपविनिर्णयः ।
मोक्षसाधननिर्णीतिर्मोक्षस्य च विनिर्णयः ॥

[१]दशार्थानधिकृत्येयं **नीतिमाला** प्रवर्तते ।
दोषानत्र तिरस्कृत्य गृह्णन्तां सूरिभिर्गुणाः ॥

ब्रह्मभागविचारस्य कर्मभागविचारानन्तर्यं सूत्रितम्—'अथातो ब्रह्मजिज्ञासा' इति। तत्र केचिदाहुः—

त्र्य्यन्तार्थविचारस्तु तदध्ययनपूर्वकः ।
तदधीनात्मलाभत्वात्त्रयीवाक्यविचारवत् ।

अनधीतवेदस्य विचारानुपपत्तेर्धर्मजिज्ञासाया वेदाध्ययनपूर्वकत्वं यथा, तथा ब्रह्मजिज्ञासाया अपि वेदान्ताध्ययनपूर्वकत्वमेव युक्तम् । अथाध्ययनक्रमानुरोधेन कर्मभागविचारानन्तर्यं ब्रह्मभागविचारस्योच्यते, तदयुक्तम् ; भिन्नाधिकारत्वात्कर्मब्रह्मभागयोः । स्वर्गादिसाधनभूतयागादिकर्मप्रतिपाद्य(द?)कस्त्रयीभागो बुभुक्षाधिकारः। परब्रह्मतत्प्राप्तितदुपायभूततदुपासनविषयो वेदान्तभागो मुमुक्षाधिकारः । अतो मुमुक्षुभिर्वेदान्ताध्ययनानन्तरं ब्रह्मविचारः कर्तव्यः ।

यद्यप्युद्गीथादीनां कर्माङ्गित्वादिविचाराय[२] (कर्माङ्गत्वादिविचाराय?) उपासनचिन्तायाः शारीरके क्रियमाणायाः कर्मविचारोऽपेक्षितः, तथापि तेषामुपासनानां वीर्यवत्तरत्वादिफलत्वाद्ब्रह्मविचारं कृत्वापि क्रियमाणः कर्मविचारो न विरोधमावहेत् ।

ननु चार्थज्ञानपर्यन्तमध्ययनं विदधतो विधेर्बलेन मुमुक्षुणापि प्रथमं कर्मविचारस्य कर्तव्यत्वात्तदानन्तर्यं ब्रह्मविचारस्यावर्जनीयमापतेत् । नैवम्; अक्षरग्रहणमात्रपर्यवसानादध्ययन-

१. दर्शनार्थानिमान्वक्तुम्—पा०.

२. कर्माङ्गित्वाद्विचाराय—पा०.

विधेः । तथाहि—अध्ययनानन्तरभावित्वादक्षरग्रहणस्य तदेव तस्य फलं भवितुमर्हति, न त्वनेन व्यवहितमर्थज्ञानम् । अक्षरग्रहणस्याप्यपुरुषार्थत्वादनुद्देश्यत्वमुच्यमानमर्थज्ञानस्यापि समानम् । नन्वर्थज्ञानस्य स्वरूपेणापुरुषार्थत्वेऽपि स्वर्गादिपुरुषार्थसाधनत्वेनोद्देश्यत्वं सम्भवतीति चेन्न ; अनुष्ठानसाध्यत्वात्स्वर्गादेः । अथानुष्ठानमर्थज्ञानस्यावान्तरव्यापार इति मतम् , तथासत्यध्ययनानन्तरभाविनोऽक्षरग्रहणस्य स्वर्गादिसाधनतयोद्देश्यत्वमुपपन्नमिति तदुत्तरकालभाविनी [१]अर्थज्ञानानुष्ठाने[२] तस्यावन्तरव्यापारतामनुभवत इति सन्तोष्टव्यम् ।

गृहीतस्वाध्याये पुरुषेऽधीतवेदत्वप्रसिद्धेश्चाक्षरग्रहणफलमध्ययनम् । अधीतवेदो हि श्रोत्रियः। न हि गृहीतस्वाध्यायमश्रुतमीमांसं श्रोत्रिय इति न वदन्ति । व्यापकत्वाच्चाक्षरग्रहणमेव फलमध्ययनस्य । नह्यध्ययनसंस्कृतानि वेदवाक्यानि न ग्रहणगोचरतां भजन्ते । अध्ययनकर्मत्वमपि स्वाध्यायस्येप्सिततमत्वात् स्वशक्त्या धर्मार्थकामादिपुरुषार्थतत्साधनावबोधित्वात् स्वरूपेण जपपारायणादिनाभीष्टसाधनत्वाच्च । एवमाकारभेदेनोभयार्थत्वाद्विनियुक्तविनियोगदोषो न स्यात् ; यथाग्नेर्दाहभासमानत्वयोः ।

ननु अर्थज्ञानस्यावैधत्वे स्वाध्यायाध्ययनानन्तर्यं मीमांसाया न स्यात् ; 'अधीत्य स्नायात्' इति स्मृतिप्राप्तेन स्नानेन प्रस्तावसरत्वात् । अतोऽर्थविचारस्याध्ययनानन्तर्यसिद्धये तत्कालोपनिपातिस्नानबाधार्थमनिच्छतोऽपि वैधत्वमङ्गीकरणीयमापद्येत ।

नैवम् ; अर्थविचारस्य रागप्राप्तत्वादेव न तावद्वैधत्वम् । स्नानस्मृतिस्तु न विचारं बाधितुं क्षमते; रागबलाद् गुरुगृहान्निवृत्तेन कर्तुं शक्यत्वात् । अतः प्राक्तनीं स्थितिमुपजीव्य [३]विचारः प्रवर्तिष्यते । अध्ययनस्य समाप्तत्वात्सकलब्रह्मचारिवृत्तिनिवृत्तिः स्नातकस्य भवति । उत्तरक्रतुविधयोऽप्यविद्धत्त्वत्तया नैनमास्कन्दन्ति ।

अथवा अधीत्येत्यत्र क्त्वाप्रत्ययस्य पूर्वकालतामात्रविहितत्वात् स्नानस्मृतिविचारयोर्न विरोधः। अथवा अध्ययनार्थविचारयोरानन्तर्यनियमो नास्माकमवश्यम्भावी । अधीतवेदत्वमेव हि

१—२. द्विवचनान्ते इमे—पदे.

३. विचारे—पा०.

विचारस्यापेक्षितम्। तदध्ययनस्य पूर्वभावित्वमात्रेणापि सिद्ध्यतीति स्मृत्यनुसारेण स्नात्वापि विचारयिष्यति।

ननु च 'स्नातकस्सदृशीं भार्यां विन्देत' इति स्नानोत्तरकालस्य दारसङ्ग्रहणावरुद्धत्वात्तत्रापि न विचारः कर्तुं शक्यते। तर्हि कृतदारो विचारयिष्यति, तदा ह्यर्थार्जनवदर्थविचारोऽप्यहरहः क्रियमाणो न विरोधमावहेत्। अनर्थकानां हुम्फडित्यादिवाक्यानामध्ययनस्यार्थज्ञानप्रयोजनत्वाभावाददृष्टफलत्वमक्षरग्रहणफलत्वं वाभ्युपेयं स्यात्। तदा विधिवैरूप्यं भवति। किञ्च सत्रबृहस्पतिसवादिषु क्षत्रियवैश्ययोरनधिकारात्तत्प्रतिपादकस्य वेदभागस्याध्ययनं वाक्षरग्रहणादिफलत्वं (ध्ययनमदृष्टफलमक्षरग्रहणादिफलं ?) वा स्यात्। न चाविधेयत्वेऽर्थविचारो निर्निबन्धनस्स्यादिति वक्तुं शक्यम्; अन्यनिबन्धनत्वादर्थविचारस्य। विधिरपि पुरुषार्थमविरोधयन्नेव[1] प्रवृत्तिहेतुर्भवति। इहापि साङ्गाध्ययनेन वेदवाक्येभ्यः प्रयोजनवदर्थानामापाततः प्रतीतेस्तन्निर्णयफले विचारे पुरुषः स्वयमेव प्रवर्तते। अतः साङ्गाध्ययनादेवाक्षरग्रहणफलात्प्रयोजनवदर्थावबोधकामनाद्वारेणार्थविचारे प्रवृत्तेर्नार्थविचारो निर्निबन्धनः। अर्थज्ञानस्याविधेयत्वेऽपि स्वाध्यायस्यार्थपरत्वं स्वतःप्रामाण्यन्यायसिद्धम्। अतो मुमुक्षोर्ब्रह्मविचारेऽध्ययनविधेरप्रतिबन्धकत्वेन मुमुक्षुणा अध्ययनानन्तरं ब्रह्मविचारः कर्तव्य इति कर्मविचारानन्तर्यं ब्रह्मविचारस्य न युक्तमिति॥

अत्राभिधीयते—

> यज्ञादीनां तु विद्याया उत्पत्तौ विनियोगतः।
> तेषामकरणे दोषबाहुल्यश्रवणादपि॥
>
> पूर्वकाण्डोदितन्यायसापेक्षत्वस्य दर्शनात्।
> विचारः कर्मणां हेतुर्ब्रह्मभागविचारणे॥

यदुक्तमध्ययनविधेरक्षरग्रहणपर्यवसानान्न तन्निबन्धनोऽर्थविचारः, साङ्गाध्ययनादेव प्रयोजनवदर्थानामापातप्रतीतेस्तन्निबन्धनोऽर्थविचार इति; तत्सुष्ठूक्तम्।

१. मवबोधयन्नेव—पा०.

यत्तु कर्मज्ञानभागयोर्भिन्नाधिकारत्वान्मुमुक्षोर्न कर्मविचारापेक्षेति ; तदपेशलम्; 'यज्ञेन दानेन तपसा अनाशकेन' इत्यादिभिर्यज्ञादीनां साधनत्वेन विद्योत्पत्तौ विनियोगात् । विविदिषन्तीति वचनाद्विविदिषायां यज्ञादीनामुपयोगः न विद्योत्पत्ताविति चेन्न ; विविदिषायास्साध्यत्वस्यैवासम्भवात् । पुरुषार्थस्तत्साधनं वा साध्यम् । न तावद्विविदिषा पुरुषार्थः; नापि तत्साधनम् ; 'ब्रह्म वेद ब्रह्मैव भवति' इति विद्याया एव पुरुषार्थसाधनत्वश्रवणात् । अत एव विविदिषा अर्थसिद्धेति न सा पुरुषव्यापारेण साध्या । विविदिषन्तीति व्यपदेशस्तु अश्वेन जिगमिषतीतिवत् द्रष्टव्यः ॥

ननु वेदनस्य वा कथं कर्मसाध्यत्वम् ? तदपि [१]प्रमाणाधीनम् । तत् स्वसामग्रीभूताद्वेदान्तवाक्याज्जायत इति किमिति कर्माण्यपेक्षते । तेषां वा कथं प्रमाणसामग्रीत्वम् ? उच्यते—नास्माभिर्वाक्यजन्यं ज्ञानं यज्ञादिसाध्यमुच्यते । अपि तु उपासनात्मकं ज्ञानम् । तत्तु फलाभिसन्धिरहितैः परमपुरुषाराधनभूतैः कर्मभिः परिशुद्धान्तःकरणस्य जायत इति युक्तं तस्य यज्ञादिसाध्यत्वम् ।

ननु अस्तूपासनस्य यज्ञादिसाध्यत्वात्तस्य तदपेक्षित्वम् ; कर्मब्रह्मविचारयोः कथं पौर्वापर्यनियमः? उच्यते—ब्रह्मस्वरूपतदुपासनतत्फलानि त्रीण्यपि शारीरके चिन्त्यन्ते । तत्रोपसानविचारवत्तदुपायभूतकर्मविचारोऽप्यपेक्षितत्वात्कर्तव्य एव । कर्मविचारस्य कर्तव्यतायां सत्यां कर्मणां साधनत्वात्तद्विचारस्यैव प्राथम्यमुचितम् । [२]अनिर्णीते साधने साध्यनिर्णयानुपपत्तेः । अत एव पूर्वकाण्डे स्वर्गादिफलचिन्तायाः प्रागेव साधनभूतयागादिचिन्ता क्रियते । अतः कर्मब्रह्मभागविचारयोः पौर्वापर्यमुपपन्नम् ।

किञ्च नित्यनैमित्तिकानां कर्मणामकरणे प्रत्यवायबाहुल्यं श्रुतिभिरुद्घुष्यते । अतो मुमुक्षुरपि कर्मविचारे प्रथमं प्रयतते । अनर्थं परिहृत्यैव ह्यभ्युदये यतितव्यम् ।

अपि च सद्विद्यादहरविद्यादीनां भेदाभेदनिर्णयः कर्मभेदाभेदनिर्णयहेतुभिर्न्यायैः शारीरके क्रियते । उक्तञ्च भगवता **बादरायणेन**—'हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्द-

१. तदपि प्रमाणज्ञानम्—पा०.

२. अननुष्ठिते—पा०.

स्तुत्युपगानवत्तदुक्तम्[१]' 'प्रदानवदेव तदुक्तम्[२]' इत्यादि। अतः कर्मविचारस्यैव पूर्ववृत्तत्वं युक्तम्।

केचिदाहुः—

अद्वितीयात्मविज्ञानमविद्याविनिवर्तकम्।
श्रूयते तस्य चोत्पत्तौ समाधिः कारणं श्रुतौ॥

औचित्याच्च विरुद्धत्वाच्छमादेः कर्मणामपि।
शमाद्यनन्तरं कर्तुं युक्तं ब्रह्मविचारणम्॥

'एकधैवानुद्रष्टव्यम्' 'तरति शोकमात्मवित्' इत्यादिभिरद्वितीयात्मविज्ञानमपवर्गसाधनतया श्रुतम्। तस्य 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वात्मन्येवात्मानं पश्येत्' इति शमादीनां साधनत्वं च श्रुतम्। यज्ञादिकर्मणां साधनत्वश्रवणेऽपि करणेतिकर्तव्यताद्यनेकभेदगर्भत्वेनाद्वितीयत्वज्ञानं प्रति तेषां साधनभावो नोपपद्यते। शमादीनां तु सर्वेन्द्रियव्यापारोपरतिरूपाणां साधनत्वमुपपन्नम्। तस्माच्छमाद्यानन्तर्यं ब्रह्मविचारस्यौचित्यादु(यु?)क्तम्।

उच्यते—

दिव्यदेहविभूत्यादिविशिष्टब्रह्मवेदनम्।
साधनं त्वपवर्गस्य बह्वीषु श्रुतिषु श्रुतम्॥

तृतीयाश्रुतिसामर्थ्यात्तस्य कर्मादि साधनम्।
शमादयः परिकरा विरोधो न च विद्यते॥

यदुक्तम्—अद्वितीयात्मविज्ञानमपवर्गस्य साधनमिति। तत्राद्वितीयत्वं विवेचनीयम्। यदि निर्विशेषत्वमद्वितीयत्वम्, तत्सर्वप्रमाणविरूद्धम्। अथ अनेकगुणविभूतिविशिष्टस्य ब्रह्मण एकत्वम्, तदभिमतमेव। तथाविधस्य ब्रह्मणो वेदनमपवर्गसाधनतया अम्नायते च—'य एषो-

१. ब्र. सू. ३. ३. २६.
२. ब्र. सू. ३. ३. ४२.

ऽन्तरादित्ये हिरण्मयः पुरुषः दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः। उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद', 'भोक्ता भोग्यं प्रेरितारञ्च मत्वा', 'पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' इत्यादिभिः। स्मर्यते च—

प्रशासितारं सर्वेषामणीयांसमणीयसाम्।
रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्॥

इति। एवं तर्हि 'एकधैवानुद्रष्टव्यम्' इत्यादिश्रुतेरर्थो वर्णनीयः। न वयं व्याख्यातारः। व्याख्यातञ्च भगवता **भाष्यकारेण**। तत्रैवानुसन्धध्वम्। एवंविधं ब्रह्मणो वेदनं कर्मानुष्ठानसाध्यमुक्तम्।

यत्तु शमादीनां वेदनसाधनत्वं 'शान्तो दान्तः' इत्यादि श्रुतिसिद्धमिति; तदपि न। 'यज्ञेन दानेन' इति तृतीयया श्रुत्या यज्ञादेः साधनत्वेन विनियोगात् 'शान्तो दान्तः' इत्यादिवचनं शमादीनामनुग्राहकत्वाभिप्रायम्। व्यापारसाध्यानां कर्मणां तदुपरतिरूपाणां शमादीनाञ्च विरोधादेककार्यान्वयो न सम्भवतीत्येतदपि नास्ति; विषयभेदात्। विद्यासाधनभूतकर्मविषयो व्यापारः। अविहिताप्रतिषिद्धकाम्यनिषिद्धकर्मविषयाः शमादय इति। तदेवं कर्मसापेक्षत्वाद्ब्रह्मज्ञानस्य कर्मविचारानन्तरं ब्रह्मविचारः कर्तव्य इति सूत्रितम्॥

इति नीतिमालायां ब्रह्मविचारस्य
कर्मविचारानन्तर्यनिर्णयाधिकारः प्रथमः॥

श्रीः

नीतिमालायां

द्वितीयाधिकार आरभ्यते.

वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यमसहमानाः केचिदाहुः—

सम्बन्धग्रहणापेक्षं शब्दादर्थावबोधनम् ।
तच्च कार्यार्थ एवेति न शास्त्रं ब्रह्मगोचरम् ॥

शब्दार्थयोस्सम्बन्धमजानतः पुरुषस्य शब्दो नार्थप्रत्ययहेतुर्भवति। सम्बन्धश्च वृद्धव्यवहारत एव ग्रहीतव्यः। व्यवहारश्च कार्यैकगोचरः। तथा हि—गामानयेत्यादिप्रयोजकवाक्यश्रवणसमनन्तरं प्रवर्तमानं प्रयोज्यमुपलभ्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति, अहं कार्यावगतिसमनन्तरं सर्वथा(दा?) प्रवर्ते । अस्याप्येतद्वाक्यश्रवणसमनन्तरं प्रवर्तमानत्वादिह(दिदं?) वाक्यमस्य कार्यज्ञानबुद्धिमुत्पादयतीति। पुनर्गवानयनदर्शनात्कार्यविशेषं निश्चिनोति। पुनरपि गां बधानेत्यादिप्रयोगभेदात्पदानामावापोद्वापवशेनावयवार्थमवगच्छति। एवं कार्यार्थ एव व्युत्पत्तेर्न सिद्धार्थे शब्दस्य प्रामाण्यम् ।

न च 'पुत्रस्ते जातः' इत्यादि वाक्यश्रवणसमनन्तरं मुखविकासादिलिङ्गेन पुत्रजन्माद्यर्थनिश्चयसम्भवात्कार्यार्थ एव सम्बन्धग्रहणमिति नियमो नास्तीति वाच्यम्; तत्रापि सुखप्रसवाद्यर्थानां हर्षहेतूनां बहूनां सम्भवाद्धर्षहेतुविशेषनिश्चयहेतुत्वायोगान्मुखविकासादेः। एवं कार्यार्थ एव व्युत्पत्तेस्सर्वशब्दानां कार्य एव प्रामाण्यमिति सिद्धरूपे ब्रह्मणि न वेदान्तवाक्यानां प्रामाण्यमिति ।

अत्राभिधीयते—

सिद्धार्थेष्वपि वाक्येषु सम्बन्धग्रहणं भवेत् ।
तस्मात्कार्यार्थ एवेति निर्बन्धो निर्निबन्धनः ॥

'पुत्रस्ते जातः' इत्यादि सिद्धार्थेष्वपि वाक्येषु सम्बन्धग्रहणं दृश्यत एव। यदुक्तं मुखविकासादिलिङ्गस्य हर्षहेतुविशेषनिश्चयहेतुत्वं न सम्भवतीति। तन्न; एतद्वाक्यश्रवणानन्तरं पुत्रजन्मसाक्षात्कारेण तदसाधारणोत्सवत्व(त्सव ?)लिङ्गेन वा पुत्रजन्मविशेषनिश्चयसम्भवात्। साधारणतयावगतस्य हर्षहेतुविकासस्य पुत्रजन्मविशेषपर्यवसानसम्भवे सति अनिर्धारितहेत्वन्तरविषयत्वशङ्कानुपपत्तेश्च।

किञ्च गामानयेत्यादिवाक्यसमनन्तरं प्रयोज्यस्यानुषङ्गिकानेकव्यापारसम्भवात्कार्यविज्ञानमपि सामान्येनावगतमिति तत्र विशेषावधारणं दुश्शकमेव। अपि चायं व्युत्पित्सुः स्वस्य प्रवृत्तिहेतुभूतायाः कार्यावगतेः पदार्थविज्ञानपूर्वकत्वावगमात्प्रयोज्यवृद्धस्यापि प्रयोजकवाक्यं पदार्थज्ञानमुत्पादयतीति निश्चिनोति। तस्माद् वृद्धव्यवहारेऽपि सिद्धार्थेष्वेव शब्दस्याभिधानमिति निश्चयः।

किञ्च प्रकारान्तरेणापि शब्दार्थसम्बन्धग्रहणं प्रचुरमुपलभ्यते। तथाहि—बालाः पितृमातुलादिभिः शशिपशुपक्षिप्रभृतीनर्थानुद्दिश्य [1]'एनमवेहि, [2]इममवगच्छ' इत्यभिप्रायेणाङ्गुल्या निर्दिश्य तत्तच्छब्दैस्तेषु तेष्वर्थेषु प्रयुज्यमानैर्बहुशः शिक्षिताः, पुनश्च काव्यनाटकाभिज्ञपुरुषसकाशमुपगम्य पदविच्छेदं कृत्वा अस्य शब्दस्यायमर्थ इति शिक्षिताः, सर्वशब्दानामर्थमवगम्य तत्तच्छब्दश्रवणसमनन्तरं तेषु तेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा सम्बन्धान्तरादर्शनात्सङ्केतयितृपुरुषाज्ञानाच्च तेषु तेषु तेषां (तेषां तेषां?) शब्दानां प्रयोगोबोधकत्वनिबन्धन इति निश्चिन्वन्ति। अतः सिद्धार्थे व्युत्पत्तेस्तस्मिन् शब्दस्य प्रामाण्यं सम्भवतीति वेदान्तवाक्यानि ब्रह्मणि प्रामाण्यं प्रतिपद्यन्त एव।

अपर आहुः—

जगत्सावयवं कार्यं तच्च स्वोचितकर्तृकम्।
कर्ता च कल्प्य एकोऽतो नासौ शास्त्रप्रमाणकः॥

१. एनं शब्दम्—पा०.

२. इममर्थम्—पा०.

अस्तु सिद्धार्थेऽपि शब्दस्य प्रामाण्यम्, तथापि जगत्कारणभूत ईश्वरो न शास्त्रप्रमाणकः; शास्त्रस्य प्रमाणान्तराप्राप्तार्थविषयत्वात्। अनुमानेन जगत्कर्तृसिद्धेश्च। तथाहि—विचित्र-सन्निवेशं भूभूधरादिकं कृत्स्नं जगत् सावयवत्वात् कार्यं भवितुमर्हति। कार्यञ्च स्वोपादानोप-करणसम्प्रदानप्रयोजनाद्यभिज्ञकर्तृकं दृष्टम्। न चेदमशक्यक्रियमशक्योपादानादिविज्ञानम्; कर्तृस्वरूपवज्ज्ञानशक्त्योरपि कार्यानुमेयत्वात्। न च जीवानां कर्तृत्वकल्पनं युक्तम्; तेषां [१]प्रतिसर्गावस्थायां प्रलीनकरणकळेबरतया अचित्कल्पानां ज्ञानशक्तिवैकल्येन विचित्र-जगन्निर्मातृत्वानुपपत्तेः।

यदपि तेषामेव कर्मद्वारेण कर्तृत्वमुपपद्यत इति, तदपि न; युगपदुत्पद्यमान-[२] जगन्निर्माणप्रयोजनतया अनन्तैर्जीवैरेकदानुष्ठितानामनन्तानामेकरूपाणां कर्मणां सम्भवे प्रमाणाभावात्ततो विलक्षणज्ञानशक्तियुक्त एकः कर्ता भवितुमर्हति।

अथ विचित्रसन्निवेशगोपुरप्राकारादेर्विलक्षणज्ञानशक्तियुक्तानेककर्तृकत्वदर्शनादत्यन्त-विचित्ररचनस्य जगतो निरतिशयज्ञानशक्तियुक्तबहुकर्तृकत्वकल्पनं युक्तमिति चेत्, तच्चा-युक्तम्; कर्तृकल्पनायामनेककल्पनादेककल्पनस्यैव युक्तत्वात्। न च जगत्कर्तुरनुमेयत्वे व्याप्तिबलेन कर्मवश्यत्वादिप्रसङ्गः; तेषां कर्मवश्यत्वादीनां जगत्करणेऽनुपयोगात्। अनुप-योगा(गि?)नामपि व्याप्तिमात्रेण पक्षप्राप्तौ सर्वानुमानोच्छेदप्रसङ्गाच्च। अतो जगत्कर्तुरनु-मानसिद्धत्वान्न वेदान्तप्रमाणकं ब्रह्मेति।

अत्रोच्यते—

जगतः कर्तृमत्त्वञ्च सिद्ध्यत्येवानुमानतः।
विशिष्टकर्तृकत्वन्तु शास्त्रादेवावगम्यते॥

यदुक्तं विचित्ररचनस्य जगत्कार्यस्य विचित्रलक्षणैककर्तृकत्वं सिद्ध्यतीति, तदयुक्तम्; विचित्र-रचनस्य रथगोपुरप्रासादादेर्बहुकर्तृकत्वदर्शनात्। तत्र यदुक्तमनेककर्तृकल्पनादेककल्पनं लघीय

१. प्रतिसर्गः—प्रळयः.

२. युगपदुपपद्यमान—पा०.

इति, तदप्यसाधु ; पूर्वोक्तादेव च हेतोर्बहुकर्तृकल्पनस्यैव युक्तत्वात्। कार्यसिद्धये हि कर्तृमत्त्वं कल्प्यते तद्यथोपपद्यते तथैव हि कल्पनीयम् ।

किञ्च अनुमानेन जगत्कर्तारं साधयतो यत्कर्तुरकर्मवश्यत्वसर्वज्ञत्वादिकं सिषाधयिषितम्, तदपि विरुद्धमापतेत्; व्याप्तिबलेन तस्य कर्तुः कर्मवश्यत्वाल्पज्ञानत्वादेः साधकत्वाद्धेतोः। तत्र यदुक्तं सपक्षे सहदृष्टानां धर्माणां दर्शनमात्रेण पक्षे प्राप्तौ सर्वानुमानोच्छेदप्रसङ्ग इति ; नैतदस्ति। व्याप्तिबलेन पक्षे प्रसज्यमानानां येषां प्रमाणान्तरेण न प्रतिहतिर्भवति, तेषामेवानुमापकत्वाल्लिङ्गस्य ।

अथ कर्मवश्यस्य अल्पज्ञस्य सकलजगन्निर्माणानुपपत्तेः पक्षधर्मत्वबलादेवाकर्मवश्यः सर्वज्ञ एव जगत्कर्ता सेत्स्यतीति मतम्, तदप्ययुक्तम् ; अकर्मवश्यस्य शरीरेन्द्रियाद्युपकरणाभावेन जगत्कर्तृत्वानुपपत्तेः। शरीरेन्द्रियाद्युपकरणरहितस्यापि सङ्कल्पमात्रेण कर्तृत्वमुपपद्यत इति चायुक्तम्; अशरीरस्य सङ्कल्पायोगात्। अत एवेच्छानिमित्तशरीराद्युपकरणवान् जगत्करोतीत्युत्प्रेक्षितुमपि न शक्यम् ।

अथ नित्यानि जगत्कर्तुः शरीरेन्द्रियाद्युपकरणानि ; अतस्तस्य जगत्करणं सुशकमिति मन्वीत, तदपि न साधीयः ; नित्यत्वेन तस्य शरीरादीनां सावयवत्वहेतोरनैकान्तिकत्वात्। अतोऽनुमानेन जगत्कर्ता न सेत्स्यति। जगतो विलक्षणैककर्तृमत्त्वे सिद्धेऽपि निमित्तोपादानशक्तियुक्तेनैकेन पुरुषेणैकदैव सङ्कल्पपूर्वकं निखिलजगत्करणं शास्त्रैकप्रमाणकमिति वेदान्तवेद्यं ब्रह्म ।

अन्ये पुनराहुः—

प्रयोजनपरं वाक्यं प्रमाणं नेतरद्भवेत् ।
तत्प्रवृत्तिनिवृत्तिभ्यामेव साध्यं प्रयोजनम् ॥

त्रय्यन्तस्याक्रियार्थत्वान्न स्यात्तस्य प्रमाणता ।

सर्वं हि वाक्यजातं प्रयोजनपर्यवसाय्येव प्रमाणं भवति ; लोके प्रयोजनशून्यानां प्रमाणतया क्वचिदप्यनुपलब्धेः ।

ननु प्रत्यक्षादीनि हि हेयोपादेयापेक्ष(योपेक्ष?)णीयस्य(यस्व?)विषयावबोधनं कुर्वन्ति प्रमाणानि दृश्यन्ते। शब्दस्य को विशेषः, येन प्रयोजनवदर्थावबोधकत्वमाश्रीयेत। उच्यते—परप्रत्यायनार्थं हि वाक्यं प्रयुज्यते। परश्च न निष्प्रयोजनानि वाक्यानि श्रावयितुं शक्यः। तस्मात्प्रयोजनशून्यानामुदय एव दुर्लभः। अतः शास्त्रं प्रयोजनपर्यवसाय्येव। प्रमाणप्रयोजनञ्च द्विविधम्। सुखं दुःखनिवृत्तिश्चेति। तद् द्विविधं प्रयोजनं प्रवृत्तिनिवृत्तिभ्यामेव लभ्यते; यथा कामिनीपरिष्वङ्गेन कामावाप्तिः, अपथ्यसेवानिवृत्तेरग्निमान्द्यनिवृत्तिः; यथा(तथा?)ज्योतिष्टोमेन स्वर्गावाप्तिः, अपगोरणनिवृत्त्या शतयातनानिवृत्तिः। अतः प्रवृत्तिनिवृत्तिसाध्यं प्रयोजनम्।

न च वाच्यं 'स्ववेश्मनि निधिरस्ति' 'नायं सर्पः' इत्यादिवस्तुस्वरूपोपदेशपरवाक्यश्रवणसमनन्तरं निधिसद्भावसर्पनिवृत्तिभ्यां हर्षभयनिवृत्तिदर्शनात्तेषामपि वाक्यानां प्रयोजनपर्यवसानमस्तीति। तत्राप्यज्ञातस्य निधिसद्भावादेः पुरुषार्थहेतुत्वाभावाज्ज्ञानविधिपरत्वस्यैवाश्रयणीयत्वात्। तस्मात्प्रवृत्तिनिवृत्तिभ्यामेव पुरुषार्थ इति प्रवृत्तिनिवृत्त्यन्वयविरहिणां वेदान्तवाक्यानां प्रामाण्यं दुर्लभमिति, न वेदान्तप्रमाणं ब्रह्मेति।

अत्र ब्रूमः—

निध्याद्यवगतेश्चापि सिद्ध्यत्येव प्रयोजनम्।
तस्माद्वेदान्तवाक्यानां प्रामाण्यमनपोदितम्॥

यत्तावदुक्तं प्रयोजनपर्यवसाय्येव शब्दः प्रामाणमिति, (तत्?) तथैव। यत्पुनरुक्तं प्रवृत्तिनिवृत्तिभ्यामेव प्रयोजनावाप्तिरिति, नैतन्नियतम्; निधिसद्भावादिप्रतिपादनपराणामपि वाक्यानां पुरुषार्थावाप्तिहेतुत्वदर्शनात्।

तत्र यदुक्त अज्ञातस्य निधिसद्भावादेः पुरुषार्थहेतुत्वाभावेन ज्ञानविधिपरत्वमेवाश्रयणीयमिति, तदयुक्तम्; ज्ञानस्यापुरुषतन्त्रत्वेन विधेयत्वासम्भवात्। न च ज्ञानार्थव्यापारस्य विधेयत्वेन तेषां ज्ञानविधिपरत्वं युक्तं वक्तुम्; तत्तद्वाक्यजन्येन निधिसद्भावादिज्ञानेन हर्षभयनिवृत्त्योर्दर्शनात्। बालातुराद्युपच्छन्दनवाक्यवदसत्येऽप्यर्थे निधिसद्भावादिज्ञानमात्रेण हर्षादीनां सम्भवान्नार्थपरत्वं सिद्ध्यतीति च न शङ्कनीयम्; उपच्छन्दनवाक्येऽप्यर्थसद्भावभ्रान्त्या

पुरुषार्थावाप्तिः। अत एव ह्यर्थस्याभावे निश्चिते सति तदानीमेव हर्षादयो निवर्तन्ते। अतो निध्यादिसद्भावप्रतिपादनपराणां वाक्यानां पुरुषार्थहेतुत्वं सम्भवत्येव ।

किञ्च 'विश्वजिता यजेत' 'न कळञ्जं भक्षयेत्' इत्यादीनां प्रवृत्तिनिवृत्तिपराणां वाक्यानां क्रियाफलसम्बन्धाश्रवणात्प्रथमं प्रयोजनान्वयो न ज्ञायते। यदा विज्ञायते, तथा-(दा?) पि प्रयोजनं मन्दतरञ्च। वेदान्तवाक्योक्तं तु निरतिशयानन्दं ब्रह्म श्रवणवेळायामेव प्रतिपन्नमिति तेषां वाक्यानामेव साक्षात्प्रयोजनपर्यवसानमिति वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यमुपपन्नम् ।

इति नीतिमालायां वेदान्तप्रामाण्यनिर्णयाधिकारो द्वितीयः ॥

श्रीः

नीतिमालायां

तृतीयाधिकार आरभ्यते.

इदानीं ब्रह्मस्वरूपं निरूप्यते ॥ अत्र केचिदाहुः—

जगज्जन्मस्थितिध्वंसकारणं ब्रह्मशब्दितम् ।
तच्च सच्चित्सुखाद्वैतस्वरूपं श्रुतिषूदितम् ॥

"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्वि-जिज्ञासस्व तद्ब्रह्म' इति इति श्रुत्या जगत्कारणं ब्रह्मेति प्रतिपादितम् । तच्च 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म' 'आनन्दो ब्रह्म' इति श्रुतिभिः सच्चिदद्वितीयानन्दस्वरूपं प्रतिपादितम् । एवं निर्विशेषस्वयम्प्रकाशसुखस्वरूपस्य सन्मात्रस्य ब्रह्मण एव अनाद्यज्ञानतिरोहि-तस्वरूपतया सुख्यहं, दुःख्यहं, देहोऽयं, मनुष्योऽयं, घटोऽयं, पटोऽयम्, इत्याद्यान्तरबाह्यवि-विधाध्यासोपादानतया जगत्कारणत्वमुपपद्यत इति । ते प्रतिक्षिप्यन्ते ।

सत्तादेर्दुर्निरूपत्वात्तिरोधेरप्यसम्भवात् ।
कारणत्वस्य वा सिद्धेः पक्षोऽयं नोपपद्यते ॥

सच्चित्सुखाद्वितीयस्वरूपं ब्रह्मेति वदद्भिः सदादिशब्दानां ब्रह्मणि प्रवृत्तौ निमित्तानि वक्तव्यानि । न तानि वक्तुं शक्यन्ते; सत्तादीनां दुर्निरूपत्वात् । तथाहि—न तावत्सत्ता जातिः सद्व्यक्तिभेदाभावात् । न च प्रमायाः सम्बन्धयोग्यत्वं सत्त्वम्; ब्रह्मणः प्रमेयत्वानङ्गीकारात् । अथासद्व्यावृत्तिः सत्त्वमिति चेत्, तदपि न । सदसद्विलक्षणस्य प्रपञ्च-स्याप्यसद्व्यावृत्तत्वेन सत्त्वप्रसङ्गात् । अथ सत्तैव सच्छब्दस्यार्थो वर्ण्यते, तदप्यसाधु; लोके सत्ताया धर्मत्वेन प्रसिद्धत्वात् ब्रह्मणः कञ्चन धर्मिणं प्रति धर्मत्वप्रसङ्गात् । तस्मात्सुदुर्नि-रूपम् ।

एवं चैतन्यगुणयोगिनि वस्तुनि चिच्छब्दस्य प्रसिद्धेः ब्रह्मणश्चैतन्यगुणानङ्गीकारात्तस्य चित्त्वमपि न निरूपणमर्हति। यदि तु चैतन्यमेव चिच्छब्दवाच्यं स्यात्, तदा प्रमाणज्ञानानामपि ब्रह्मत्वं भवेत्। अथ प्रमाणज्ञानं न चैतन्यम्, अपि त्वन्तःकरणवृत्तिरूपत्वाज्जडरूपमिति चेत्, तर्ह्यन्तःकरणवत्तस्मादपि विषयोपलब्धिर्न स्यात्। अथ जडव्यावृत्तत्वं चित्त्वम्, तच्च स्वाधीनस्वप्रकाशत्वमिति मतम्; तच्च नैवम्; स्वव्यतिरिक्तप्रकाशानभ्युपगमेन स्वाधीनप्रकाशत्वाभावात्। तस्माच्चित्स्वरूपत्वं ब्रह्मणो दुर्विवेचम्।

एवं सुखरूपत्वमपि ब्रह्मणो न निरूपयितुं शक्यम्। सुखं मे स्यात्, सुखी भूयासमिति ह्यात्मगुणत्वेन तदनुभूयते। तथा पदार्थविदोऽपि बुद्धिसुखदुःखेच्छादीनामात्मगुणत्वमाचक्षते। तस्मात्तस्य गुणत्वप्रसिद्धेर्न सुखरूपं ब्रह्म भवितुमर्हति।

अथ अनुकूलत्वं सुखरूपत्वमिति मतम्, तदा (था?) पि वक्तव्यं, ब्रह्म कस्यानुकूलं भवतीति। न तावज्जीवानाम्; ब्रह्मव्यतिरिक्तानां तेषामनभ्युपगमात्। स्वस्यैवेति चेत्, तत्रापि वक्तव्यम्, किमिदमानुकूल्यन्नाम?। भोग्यत्वमिति चेत्, तदपि न सिद्ध्येत्; स्वस्य भोक्तृत्वाभावेन भोग्यत्वानुपपत्तेः। दुःखनिवृत्तिरूपत्वमिति च न वाच्यम्; ब्रह्मणो निवृत्तिरूपत्वेनाभावात्मकत्वप्रसङ्गात्। निरपेक्षत्वं सुखरूपत्वमिति चायुक्तम्; काष्ठलोष्टादीनामपि निरपेक्षत्वेन सुखरूपत्वप्रसङ्गात्। तस्मात्सुखरूपत्वमपि ब्रह्मणो दुरुपपादम्।

यदिदमद्वितीयत्वं ब्रह्मण उक्तं, तदपि चिन्त्यम्। किं सदृशद्वितीयरहितत्वं तद्युक्तम्; ब्रह्मद्वित्वासम्भवात्। स्वकार्येण प्रपञ्चेन सद्वितीयं न भवतीत्यद्वितीयं ब्रह्मेति चेत्, तदपि न विरुद्धम्; कार्यकारणयोरेकत्वात्।

अथ 'सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्' इति प्रतिसर्गावस्थायां सन्मात्रस्य ब्रह्मणः सजातीयविजातीयस्वगतभेदरहिततयाभिधानात् 'नेह नानास्ति किञ्चन' 'अथात आदेशो नेति नेति' ब्रह्मणि नानात्वनिषेधात् 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति घटादिकार्यस्यासत्यताप्रतिपादनमुखेन ब्रह्मकार्यस्य प्रपञ्चस्य मिथ्यात्वप्रतिपादनात् 'सर्वं खल्विदं ब्रह्म' इति बाधितार्थसामानाधिकरण्यात्, 'तरति शोकमात्मवित्' इति प्रमात्रादिलक्षणस्य संसारस्य ज्ञाननिवर्त्यत्वोपदेशेन मिथ्यात्वावगमाच्च निर्धूतनिखिलविशेषमद्वि-

तीयं ब्रह्मेत्यभिधीयते। न च भेदावलम्बिभिः शास्त्रैः प्रत्यक्षादिभिश्चासां श्रुतीनां विरोधः शङ्कनीयः; भेदवासनादोषमूलत्वेन तासां दौर्बल्यात्। प्रत्युताद्वैतश्रुतीनां द्वैतनिषेधपरत्वेन परत्वात्ताभिर्भेदावलम्बिनां शास्त्राणामेव बाध्यत्वं भवति।

अनुमानादप्यद्वितीयत्वं प्रपञ्चमिथ्यात्वञ्च साधयितुं शक्यम्। तथाहि—विगीतो भेदव्यवहारोऽद्वैतवस्त्ववलम्बनः, भेदव्यवहारत्वात्, चन्द्रभेदव्यवहारवत्; विप्रतिपन्नः प्रपञ्चो मिथ्या, दृश्यत्वाच्छुक्तिरूप्यतादात्म्यवत् इति। तस्मान्निरस्तविशेषमद्वितीयं ब्रह्मेति।

तदसाम्प्रतम्; प्रकृतिप्रत्ययात्मकपदसङ्घातरूपवाक्यस्यानेकपदार्थसंसर्गावबोधकत्वेन कस्यचिदपि वाक्यस्य निर्विशेषवस्तुप्रतिपादनासामञ्जस्यात्। शास्त्रं तावन्नाद्वैतवस्तुनि प्रमाणम्। 'सदेव सौम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' इति वाक्यमपि सविशेषमेव वस्तु प्रतिपादयति। तथाहि—अग्र इति कालविशेषः प्रतीयते। आसीदिति क्रियाविशेषः। इदं सदिति जगतः सदात्मकत्वम्। एकमेवेति नामरूपविभागाभाववचनेन सच्छब्दवाच्यस्य ब्रह्मण उपादानत्वम्। अद्वितीयमित्यधिष्ठात्रन्तरनिराकरणेन निमित्तत्वम्। अत एवानन्तशक्तियोगश्च। अतो नानेन निर्विशेषवस्तुसिद्धिः।

'नेह नानास्ति किञ्चन' इति वाक्यमपि तत्त्वोपदेशपरमुपासनोपदेशपरं वा। उभयथापि सर्वभेदनिषेधो नानेन शक्यते वक्तुम्। प्रमात्राद्यभावेनोपदेशानुपपत्तेः। अत इदं वाक्यमब्रह्मात्मकनानावस्तुनिषेधपरम्। उपबृंहितञ्चैतद्भगवता

'न तदस्ति विना यत्स्यान्मया भूतञ्चराचरम्[१]' इति।

